Thanjavur Sarasvati Mahal - Series No. 297.

SARABHOJI RAJA'S

# GUNARATNAKARA

by Sri Nrusimha Kavi.

श्रीनृसिंहकविकृतः

## ॥ श्रीशरभोजिराज गुणरत्नाकरः ॥

*Published by*

**DIRECTOR,**

**SARASVATI MAHAL LIBRARY, THANJAVUR.**

1990 ] Price Rs. 25—00

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

Thanjavur Sarasvati Mahal - Series No. 297.

**SARABHOJI RAJA'S**

# GUNARATNAKARA

*by*

Sri Nrusimha Kavi

Edited with Introduction in Sanskrit and Tamil

*by*

Vedanta Siromani, Vedanta Visharada & Tamil Vidwan

**Sri N. SRINIVASAN.**

*Sanskrit Pandit, Sarasvati Mahal Library, Thanjavur.*

0297
Sarasvati Mahal Library. Thanjavur

*Published by*

DIRECTOR,

SARASVATI MAHAL LIBRARY, THANJAVUR.

1990 ] Price : Rs. 25—00

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

First Edition : — 1990.

Published with the financial assistance from the Department of Culture, Ministry of Education Government of India.

*Published by*

Director,
Sarasvati Mahal Library Thanjavur.

*Printed at*

T. M. S. S. M. Library Press.
Thanjavur.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तञ्जापुरी सरस्वतीमहाल् ग्रन्थमालायाः पुष्पम् - २९७

श्रीनृसिंहकविकृतः

# ॥ श्रीशरभोजिराज गुणरत्नाकरः ॥

सरस्वतीमहालय संस्कृतपण्डितेन

वेदान्तविशारद - वेदान्त शिरोमणि - तमिल् विद्वान्

तञ्जावूर् न. श्रीनिवासेन

संशोध्य संस्कृतद्राविडीप्रस्तावना सहितं परिष्कृत्य संपादितः ॥

प्रकाशकः

निर्देशकः

सरस्वतीमहाल् ग्रन्थालयः तञ्जापुरी ॥

१९९० ] [ रू. २५—००.

CC-0. Sarāsvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रथमावृत्तिः — १९९०

प्रकाशिका :

तञ्जपुरी शरभोजिमहाराजस्य सरस्वतीमहाल् ग्रन्थालय कार्यकारिणीसमितिः
तञ्जापुरी

तञ्जापुरी
सरस्वतीमहाल् ग्रन्थालय कार्यकारिणीसमिति मुद्राक्षरशालायां मुद्रितम्

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

# PREFACE.

**

Gunaratnakara of Narasimha Kavi is one of the notable works in Alankara Sastra. It praises the Tanjore Maratha King Serfoji II. who ruled Thanjavur from 1798 to 1832 A.D. It is an unpublished work and it is now published from the Library manuscript for the first time through the Sanskrit Section. The author of this work Narasimha was in the Court of King Serforji II. The king encouraged many poets and they produced several works in the field of literature, art, architecture, dance, music and drama in many languages..

This work was entrusted to Siromani Thiru N. Srinivasan, Sanskrit Pandit of this Library for editing. He has taken great effort for editing and

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

he has made it a worthy addition to the researchers by his introduction in Sanskrit and Tamil, for which he is entitled to our deep gratitude. Our thanks are due to Sarasvati Mahal Library Society Press for their neat execution of printing.

We wish to record here our standing debt of gratitude to the Government of India for their publication grant.

Thanjavur,
16—8—1990.

M. Sadasivam,
DIRECTOR.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

# ॥ प्रस्तावना ॥

संस्कृतसाहित्यप्रपञ्चे अलङ्कारशास्त्रं शब्दार्थशोभाधायकत्वात्किमपि कमनीयं पदमलङ्करोति । अलङ्क्रियतेऽनेनेति करणसाधनोऽयं शब्दः शब्दार्थालङ्कारमित्यभिधीयते । अलङ्करणमलङ्कारः इति । उक्तञ्च–

“शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ॥ -इति

अत एव ‘सौन्दर्यमलङ्कारः’ इति वामनेन काव्यालङ्कारसूत्रवृत्तौ लक्षितम् । काव्यप्रपञ्चे तु अलङ्कार एव प्रधानमिति प्राचां मतम् । अतः अलङ्कारस्यैव काव्ये सौन्दर्याधायकत्वमङ्गीकृतं तज्ज्ञैः । उक्तञ्चाग्निपुराणे – “अर्थालङ्काररहिता विधवेव सरस्वती” इति । तत्रालङ्काराणां प्राधान्येन शासनात्, ‘प्राधान्येन व्यपदेशा भवन्ती’ति न्यायात् एतद् ‘अलङ्कारशास्त्र’मित्युच्यते । ‘अलङ्कृतिरलङ्कारः’ इति भावव्युत्पन्नोऽयं शब्दः ॥

इममलङ्कारशास्त्रं केन, कदा, प्राविष्कृतं इति निर्णेतुं न शक्यते । परन्तु वेदपुराणेतिहासेषु क्वचित्क्वचित् उपलभ्यते ।

CC-0. Sārasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अलङ्कारशास्त्रस्याग्निपुराणे मूलमुपलभ्यत' इति द्विजेन्द्रनाथशास्त्रिमहोदयः अभिप्रैति । तदिदमलङ्कारशास्त्रं षट् संप्रदायभेदभिन्नम् । संप्रदायाश्च ते रस - अलङ्कार - गुण - वक्रोक्ति - ध्वनि - औचित्याख्याः ॥

**अलङ्कारसंप्रदायः –**

आलङ्कारिकसंप्रदाये पदवाक्यप्रमाणज्ञो नानाशास्त्रनिष्णातो रक्रिलगोमिसूनुर्भामहनामाचार्यः प्रधानत्वेनाद्रियते । आचार्योऽयं षट्परिच्छेदात्मकं सलक्ष्यलक्षणं काव्यालङ्काराख्यं प्रबन्धरत्नं महता श्रमेण निबबन्ध । अस्य प्रबन्धस्य टीकाकारौ रुद्रटोद्भटावपि अलङ्कारसंपोषकौ । आलङ्कारिकाणां नये तु अलङ्कार एव काव्यस्य जीवातुत्वेनाद्रियते । एषां मते काव्यालङ्कारहीनत्वं तथैव हास्यास्पदं यथाग्नेरनुष्णत्वम् । उक्तञ्च चन्द्रालोके - [११८]

**"अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती ।**
**असौ न मन्यते कस्मादनुष्णमनलं कृती ॥"**

भरतमुनिना नाट्यशास्त्रे किल अनुप्रासोपमारूपकदीपकाख्याः अमीचत्वार एवालङ्काराः प्रतिपादिताः । येष्वेकः शब्दालङ्कारः त्रयोऽन्येऽर्थालङ्कारा इति । तदनु कालक्रमानुरोधेन विकासं गतास्ते कुवलयानन्दकारेण शतोत्तरपञ्चविंशति सङ्ख्याका उपन्यस्ताः । सूक्ष्मदृशा विमृश्यमाने तु को नाम अलङ्कारान् इयत्तया परिच्छेतुमलङ्कर्मीणः । तथाऽप्याचार्यैस्ते साधारणतया

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

न गणनया निबन्धिताः । ते च अलङ्काराः पुनर्द्विविधाः - शब्दालङ्काराः, अर्थालङ्काराश्च । तत्र तावदर्थालङ्काराः उपमा - उत्प्रेक्षा - रूपक - दीपक - अन्योक्ति - समासोक्ति प्रभृतयः । शब्दालङ्कारास्तु पुनः चित्र - श्लेष - अनुप्रास - वक्रोक्ति - युक्ति - यमक - पुनरुक्ति - आभासाः षडेव ॥

अलङ्कारशास्त्र प्रणेतारः -

अलङ्कारशास्त्रप्रणेतारः दण्डि - भामह - भट्ट - उद्भट - रुद्रट - भट्टनायक - वामन - मुकुल - प्रतीहारेन्दुराज - आनन्दवर्धनाचार्य - महिमभट्ट - वक्रोक्तिकार - हृदयदर्पणकार - अभिनवगुप्त - शौद्धोदनि - वाग्भट - रुय्यक - भोजराज - मम्मट - हेमचन्द्र - केशवमिश्र - पीयूषवर्ष - विद्यानाथ - विश्वनाथ - गोविन्दठक्कुर - अप्पयदीक्षित - जगन्नाथ - विद्याभूषण - विश्वेश्वरपण्डित - अच्युतरायप्रभृतयः बहवः आलङ्कारिकाः प्रसिद्धाः[1] । तेष्वन्यतमोऽयं 'नृसिंहकविः' ।

कोऽयं कविः ?

द्राविडदेशे विद्यमान तिरुच्चि, तञ्जावूरमण्डलान्तर्गत- ज्यापरिमितः, कावेरीवण्णारुप्रभृतीभिः प्रसिद्धाभिः नदीभिः परिवृतः, नदीमातृकः, भूप्रदेश एव पुरा 'चोलदेशः' इति

1 संस्कृतसाहित्यविमर्शः - द्विजेन्द्रनाथ झा. P. 632.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रसिद्धिमवाप्य प्राख्यापयन् । तस्य च राजधानी नगरी ललामभूता 'तञ्जपुरि' नाम नगरी । तामधिष्ठाय चोलभुवमिमां पूर्वं चोलभूपाः, पश्चात् क्रि० १५८५ - १६७३ पर्यन्ते काले नायकवंशीया भूनायकाः, तदनन्तरं क्रि० १६७६ - १८५५ पर्यन्ते काले भोसलकुलजन्या महाराष्ट्रराजन्याश्च अपान्तु ॥

तादृश भोसलकुलराजन्येषु क्रि० १८०० - १८३२ पर्यन्ते काले तञ्जपुरीसिंहासनं अधिष्ठाय द्वितीयः शरभोजिः अद्वितीयः महाराजः व्यराजत । द्वितीयतुलजामहाराजेन पुत्रत्वेन स्वीकृतोऽयं शरभोजि महाराजः । अस्य च सभां काव्यनाटकालङ्कार निष्णाताः षड्दर्शनपराङ्गनाश्च पण्डितप्रकाण्डाः अलमकुर्वन् । राजा च धनादिसाहाय्येन तान्निश्चिन्तान्कारयामास । तेषु कविवर्येषु नृसिंहकविरपि अन्यतमः । अयं तेलुगुब्राह्मणः । शुकतीर्थकवेः शिष्यश्चेति ज्ञायते[1] ।

कविरयं 'गुणरत्नाकरं' नाम अलङ्कारग्रन्थमिमं विरचयामास । यथा वा विद्यानाथः स्वग्रन्थे प्रतापरुद्रीये अलङ्कारशास्त्रे उदाहरणाय प्रतापरुद्रगुणवर्णनं कृत्वा स्वग्रन्थं पवित्रयामास । तथैवायं कविरपि अर्थालङ्काराणां सर्वेषामपि उदाहरणतया द्वितीयशरभोजिमहाराजगुणवर्णनमेव करोति इति 'गुणरत्नाकरमिति' ग्रन्थस्यनामापि सार्थकं भवति । परन्तु महदिदं विषादस्थानं यत्, अस्य कवेः परिचयादिकं दातुं न किमपि प्रमाणमत्र

---

1. Thanjavur Sarasvati Mahal Library Descriptive Catalogue of Sanskrit Manuscripts Vol. XIX p. xii.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तनुपलभ्यते । यदि तस्येन शोभनं भवेत् । तथा च न वयं वक्तुं समर्था भवामः यत् तस्य परिवारः कः ? सः ग्रन्थान्तरं किं किमकरोदिति । अतः तस्य नाम निर्देशपूर्वकः कालः प्रपञ्चितः ॥

## मातृकां प्रति विज्ञप्तिः –

भुवनप्रसिद्धेऽस्मिन् सरस्वतीमहालयाख्य ग्रन्थालये "गुण-रत्नाकर" नाम निर्दिष्टः ग्रन्थः Burnells Nos. 5322, Descriptive Catalogue No. 5207 — 5210 तथा अस्मान् ३/१८ संख्याङ्कितासु कागदपत्रात्मिकासु तालपत्रात्मिकासु मातृकासु लभ्यते एव । परन्तु नाद्यापि मुद्रापितः प्रकाशितः चेति मत्वा तत्प्रकटने कृतप्रयत्नोऽभवम् ।

## कृतज्ञता निवेदनम् –

ग्रन्थस्याऽस्य संपादने प्रोत्साहं तथा साहाय्यं प्रदातृभ्यः भूतपूर्व संस्कृतपण्डितेभ्यः ब्रह्मश्रीयुत पु. सा. पद्मनाभशर्मभ्यः मम कार्तज्ञ्यं प्रथमं निवेदयामि । तथैव सरस्वतीमहालयस्य निर्देशकः श्री सदाशिव महाशयेभ्यश्च मम कार्तज्ञ्यं निवेदयामि ॥

यथाशक्ति निर्दोषं, सुन्दरं च ग्रन्थमिमं मुद्राप्य पाठकानां परमोपकारं कृतवद्भ्यः सरस्वतीमहालयमुद्रणशालाकर्मचारिभ्यः सर्वेभ्योऽपि धन्यवादान्समर्पयामि ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

'गच्छतस्स्खलनमि' तिरीत्या यत्र कुत्राऽपि अनुपपत्तिः अन्यथापत्तिः इत्यादयो दोषास्समुपलभ्यन्ते चेत् तान् प्रियपाठकाः संसूच्य धन्यवादमपि स्वीकुर्वन्तु, प्रोत्साहयन्तु चास्मान् उत्तरोत्तर-कर्मणीति प्रार्थयामि ॥

इत्थं सविनयः

तञ्जावूर्
*15-6-86.*

तञ्जावूर् एन्. श्रीनिवासन्,
संस्कृतपण्डितः

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

# நூன்முகம்

❖❖❖❖

பொன்னி நதியின் ஆற்றுப்பெருக்கால் தஞ்சைத் தரணி வளங்கொழிக்கும் நிலமாக விளங்குகிறது. இந் நிலத்தில் நெற்பயிற் மட்டுமல்லாது, பன்மொழிகளிலும் இலக்கிய - இலக்கணங்கள்; இசை - நாட்டியம் - நாடகம் போன்ற பல்வேறு கலைகள் தோன்றி நாட்டையும், நாட்டு மக்களையும் தேவருலகமாக மாற்றிவருகிறது. இத்தகைய இந்தத் தஞ்சை மண்டலத்தை முறையே சோழர்களும், நாயக்கர்களும், மராட்டியர்களும் அரசாட்சி செய்தனர். இவர்களில் கி. பி. 1798 — 1832 வரை அரசாட்சி செய்தவர் இரண்டாம் சரபோசி மன்னராவார்.

இம்மன்னர் காலத்தில்தான் உலகப் புகழ்பெற்ற சரசுவதி மகால் நூலகம் மறுமலர்ச்சியடைந்து ஒரு கலங் கரை விளக்கமாகத் திகழலாயிற்று- பன்மொழிப் புலவர் களும், இசைவாணர்களும் இவரைப் புகலிடமாகக்கொண்டு பல அரிய நூல்களை யாத்தனர். இவைகளில் பல நூல்கள் இன்னும் அச்சேறவில்லை. அச்சேறாத நூல் களின் வரிசையிலிருந்த 'குணரத்னாகரம்' என்னும் இந்நூல் தற்போது அச்சிடப்பெற்று வெளிவருகிறது.

நூல் வரலாறு—

இந்நூல் ஒரு அலங்கார சாஸ்திரம். இதனை தமிழில் அணி இலக்கணம் என்பர். சப்நாலங்காரம்,


CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

அர்த்தாலங்காரம். (சொல்லணி - பொருளணி) என அணி இலக்கணம் இரண்டு பிரிவுகளாகப் பிரிக்கப்பெறுகின்றன. இத்தகைய அணி இலக்கணத்திற்கு நீண்டதொரு வரலாறுண்டு. குறிப்பாக வடமொழியில் அணி இலக்கிய - இலக்கணங்களை எழுதியவர் பல்லோராவர். அவர்களில் குறிப்பிடத்தக்கவர்கள் : தண்டி, பாமஹர், பட்டர், உத்படர், ருத்ரடர், பட்டநாயகர், வாமன முகுலர், ப்ரதிஹாரேந்துராஜர், ஆனந்தவர்த்தனர், மஹிமபட்டர், வக்த்ரோக்திகாரர், ஹ்ருதயதர்ப்பண காரர், அபிநவகுப்தர், வாக்படர், ருய்யகர், போஜ ராஜர், மம்மடர், ஹேமசந்திரர், கேசவமிச்ரர், பியூஷ வர்ஷர், விஸ்வநாதர், டாகுர், அப்பையதீக்ஷிதர், ஜகந்நாதர் வித்யாபூஷணர், விஸ்வேஸ்வர பண்டிதர், அச்சுதராயர் போன்ற புலவர்கள் புகழ்வாய்ந்தவர்கள்.

இத்தகைய புலவர் வரிசையில் ந்ருஸிம்ஹ கவியும் தனக்கென ஒரு நல்லிடத்தைப் பெற்றுள்ளார் எனில் மிகையில்லை.

புலவர் வரலாறும், சுவடி வரலாறும்—

இரண்டாம் சரபோசி மன்னரின் அவையை அலங்கரித்த புலவர் பெருமக்களில் ந்ருசிம்ம கவியுமொருவர். இவர் தெலுங்கு மொழியைத் தன் தாய்மொழியாகக் கொண்டவர். 'சுகதீர்த்த கவி'யின் சீடராகக் கருதப் பெறுகிறார். இவரைப்பற்றிய வேறுசெய்திகள் கிடைத்தில. இவரியற்றிய 'குணரத்னாகரம்' என்னும் இந்த நூல் மட்டுமே கிடைத்துள்ளது. வேறு நூல்கள் எழுதினாரா? இல்லையா? என்பதைப்பற்றிய எவ்விதக் குறிப்புக்களும் கிடைத்தில.

இந்நூல், அலங்கார சாஸ்திரத்திலேயே அண்மைக் காலத்தில் எழுந்ததாகும். அதாவது, 19 ஆம்

CC-0. Sarasvati Mahal Series, Digitized by Sri Muthulakshmi Research Academy

நூற்றாண்டின் முற்பகுதியில் வெளிவந்தது. இந்த நூல் வித்யாநாதர் என்னும் புலவர் பெருமான் இயற்றிய 'பிரதாபருத்ரீயம்' என்னும் நூலை அடியொற்றி எழுதப் பெற்றது. (ஆந்திரமாநிலத்தின் வாரங்கல்லின் அரசனும் 13-ஆம் நூற்றாண்டில் வாழ்ந்தவனுமான 'பிரதாப ருத்திரன்' என்னும் மன்னனைப் புகழ்ந்து எழுதப்பெற்ற அணி இலக்கணமே 'பிரதாபருத்ரீயமாகும்'. இந்த நூலைப் போலவே இதில் இரண்டாம் சரபோசி மன்னனைப் புகழ்ந்து பாடப்பெற்றுள்ளது.) இதில் வருகின்ற அணிகளுக்குரிய உதாரணச் செய்யுட்கள் (சுலோகங்கள்) ஒவ்வொன்றிலும் சரபோசியின் குலப்பெருமை, வீரம், கொடை, கருணை, புகழ் போன்ற பல்வேறு செய்திகளைக் குறித்துள்ளார். அந்த அந்த அணிகளுக்கேற்ப சுலோகங்களும், அதற்குரிய விளக்கக் குறிப்புக்களையும் இயற்றியுள்ளார். இதனால் இம்மன்னனுடைய வரலாற்றுத் தொடர்புடைய செய்திகளும் நமக்குக் கிடைக்கின்றன. 'ரத்னாகரம்' என்னும் சொல் 'கடலை'க் குறிக்கும். ஆதலால் குணரத்னாகரம் — 'குணக்கடல்' என்னும் பெயரில் சரபோசி மன்னரின் குணநலன்களை எடுத்தியம்புவதே இந்நூலின் உட்பொருள் என்னும் கருத்து வெளிப்பட 'குணரத்னாகரம்' என்றும் இந்நூலுக்குப் பெயரிடப் பெற்றுள்ளது.

இந்த நூல் இந்நூலகத்தின் வடமொழிப்பிரிவில் B. No. 5322, 5325, அமானத் 3 / 18 ஆகிய எண்களில் வைத்துப் பாதுகாக்கப்படுகின்றன. இந்நூலகத்தின் வடமொழிச் சுவடி விளக்கப்பட்டியலில் 5207, 5210 ஆகிய எண்களில் காணப்படுகிறது.

**நன்றியுரை —**

இந்நூலைப் பதிப்பிக்கும் பணியை நல்கிய இந்நூலக இயக்குநர், திரு. மு. சதாசிவம், M. A., M. Litt., அவர்

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

களுக்கு எனது நன்றியைத் தெரிவித்துக்கொள்கிறேன். இந்நூல் பதிப்பிக்கும் போழ்து அவ்வப்போது பல நல்லறிவுரை கூறி எனது ஐயங்களை நீக்கியருளிய எனது ஆசிரியரும், இந்நூலக முன்னாள் வடமொழிப் பண்டிதருமான திரு. பு. மா. பத்மநாப சர்மா அவர்களுக்கும் எனது நன்றியைத் தெரிவித்துக்கொள்கிறேன். மற்றும் இந்நூலக அச்சக நண்பர்களுக்கும் எனது நன்றியைத் தெரிவித்துக் கொள்கிறேன்.

இதில் ஏதேனும் குறைகள், பிழைகள் தென்படுமாயின் அதனை எனக்குத் தெரிவித்தால் நன்றியுடையேனாவேன். இதனால் அடுத்துப் பதிப்பிக்கும்போழ்து அது திருந்திய பதிப்பாக வெளிவர உதவும்.

தஞ்சாவூர்,

4—8—1990

ந. ஸ்ரீநிவாஸன்,
சமஸ்கிருதப் பண்டிதர்.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

॥ श्रीः ॥

॥ श्री नरसिंहकविकृत ॥

# ॥ श्रीशरभोजिराजगुणरत्नाकरः ॥

श्रीमानम्बुजसुन्दराननलसद्धं श्रीनिनादाहत-
ध्वान्ताभीरवधूविनोदचतुरश्रीकीर्तिशौर्योन्नतः ।
कृष्णः स्वेष्टजनेष्टसृष्टिनिरतस्सम्फुल्लपद्मेक्षणो
मां पुष्णातु पयःपयोधितनयानाथः परं दैवतम् ॥

अलङ्कृतीनां कविसार्वभौमैः
कृतं पुरा लक्षणपद्यजातम् ।
सङ्कीर्त्य वक्ष्याम्यहमत्र लक्ष्यं
श्रीचोलभूमीशगुणानुबद्धम् ॥ -२

यस्य ब्रह्माण्डभाण्डाद्बहिरपि वितता राजते श्लाघनीया
देवैरप्यच्छकीर्तिः श्रुतिविहितमहादानजातप्रजाता ।
वक्तुं नाहं सुशक्तः शरभनरपते वैभवं तस्य भूयः-
संक्षेपाद्ब्रच्मि तस्मिन्मयि विबुधवराः
कुर्वतां तेऽनुकम्पाम् ॥ -३

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अत्र सर्वेषामलङ्काराणामुपमालङ्कारबीजत्वम् स एवादौ कथ्यते ।

उपमालङ्कारः –

"उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः"

यत्र द्वयोर्वस्तुनोः सादृश्यलक्ष्मीः उल्लसति तत्रोपमालङ्कारः । द्वयोरित्युक्त्या अनन्वयव्यवच्छेदः । तत्र स्वस्य स्वेनैव सादृश्य-प्रतिभासात् । ननु एवं उपमेयोपमायामतिव्याप्तिः । तदुदाहरणे "धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि" इत्यत्र धर्मार्थयोः द्वयोः पूर्णश्रीमत्त्वेन सादृश्यप्रतिभासात् इति चेन्न, सादृश्यान्तरप्रतीति-पूर्वकत्वाभावस्य विवक्षितत्वात् । तथा च द्वयोः यत्रैक सादृश्य प्रतीयते तत्रोपमा । उपमेयोपमायां तु सादृश्यद्वयमिति न तत्र अतिव्याप्तिः ।

सा द्विधा । पूर्णा, लुप्ता चेति । उपमानोपमेय-वाचकधर्माः यत्र सन्ति तत्र पूर्णा । अन्यत्र लुप्ता । यथा –

पूर्णोपमा –

जनानामानन्दं जनयति कराम्भोजकुहरात्
समुत्पन्ना कीर्तिर्विधुरिव जगत्यां तु वितता ।

लुप्तोपमा –

प्रदानैः कानीनन्कमलवदनः काम्यकलनो
जयत्यस्याचन्द्रार्कं शरभधरणीपालकमणिः ॥ -४

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अत्र पूर्वार्धे पूर्णोपमा । 'विधुरिव कीर्तिर्जनानामानन्दं जनयति' इत्यत्र उपमानोपमेयवाचकधर्माणां चतुर्णामपि उपादानात् । द्वितीयार्धे तु लुप्तोपमा । 'प्रदानैः कानीनन्' इत्यत्र वाचकलोपः । कानीन इवाचरतीत्यर्थे विहितस्य आचारार्थकस्य क्विपः इवशब्देन सह लोपात् । 'कमलवदन' इत्यत्र धर्मवाचकलोपः । कमलमिव वदनं यस्येत्यत्र इवशब्दस्य लोपात् । अयं च समासविधायकशास्त्रकृतः । इतरस्तु ऐच्छिकः । प्रसन्नत्वादिभिरित्यपि वक्तुं शक्यत्वात् ।

अथानन्वयालङ्कारः --

'उपमानोपमेयत्वं यदेकस्यैव वस्तुनः"

यत्र 'एकस्यैव' वस्तुनः उपमानोपमेयत्वं स्फुरति तत्राऽनन्वयालङ्कारः । 'एकस्यैव' इत्युक्त्या उपमानव्यवच्छेदः ।

यथा वा --

गाङ्गेयस्य शरासनेतु सदृशः श्रीराघवस्याऽपरः
शौर्ये पद्मभवस्य सर्जनविधौ ईशस्य संवेदने ।
तुल्यः श्रीशरभेन्द्रसर्वबुधाधीशेशितुः क्ष्मातले-
ष्वस्ति स एव सर्वविबुधाभीष्टार्थसन्दोहदः ॥ -५

अत्र शरासनादिषु गाङ्गेयादीनां अन्ये सदृशाः सन्तु, अस्य तु अयमेव सदृश इत्युक्त्या एकस्यैव उपमेयोपमानभावः प्रतीयत इत्यनन्वयालङ्कारः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अथोपमेयोपमा –

"पर्यायेण द्वयोस्तच्चेदुपमेयोपमा मता"

यत्र द्वयोः पर्यायेण "अस्याऽपरं अपरस्यायं" इति तच्चेत् उपमानोपमेयत्वं, चेत् उपमेयोपमा मता संमता ।

यथा वा –

शौर्ये जह्नुसुतोद्भवेन सदृशो यो यस्य गङ्गासुतः
तुल्यः श्रीतनयेन सोऽपि मदनः सद्रूपलावण्ययोः ।
तौल्यं कञ्जभवेन कीर्तिविषये संप्राप्तवान्पद्मभूः
सोऽयं श्रीशरभेन्द्रसिन्धुरशनानाथः समुज्जृम्भते ॥ -६

अत्र, 'शौर्यादिविषयेषु यो भीष्मादिभिस्तुल्यः तेऽपि यस्य सदृशाः सोऽयं' इत्युक्त्या पर्यायेण द्वयोः उपमेयोपमानभावः प्रतीयत इति ॥

अथ प्रतीपम् –

"प्रतीपं उपमानस्योपमेयत्वप्रकल्पनम्"

यत्र प्रसिद्धयोः उपमानोपमेययोः वैपरीत्येन उपमानस्य, उपमेयत्वकल्पनं तत्र प्रतीपम् ।

यथा वा –

औन्नत्यगाम्भीर्यपराक्रमेषु
मेरुः पयोधिः सुरराट्सुतश्च ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

क्षितीश्वराणामुपमानभूताः
विपर्यासौ च्चोत्तपतिः हि तेषाम् ॥ -७

अत्र, 'लोके सर्वेषां मान्धातृप्रभृतीनां क्षितीश्वराणां औन्नत्यादि-विषयेषु उपमानत्वेन प्रसिद्धानां सेर्वादीनां असौ श्रीशरभेन्द्रमहाराजो विपर्या उपमानं' इत्युक्त्या उपमानस्य उपमेयत्वं प्रतीयत इति ॥

"अन्योपमेयत्वाभेन वर्ण्यस्यानादरश्च तत् ॥

यत्र वर्ण्यस्य उपमेयस्य उपमानत्वं परिकल्प्य तस्यो उपमेय-मन्यत् परिकल्प्य तेन वर्ण्यस्य अनादरः प्रतीयते तत्रापि **प्रतीपम्** ।

यथा वा –

जवेषु गन्धर्व तवाद्य गर्वो !
न च्चैव योग्यः सदृशं त आस्ते ।
मनो हि भूयस्त्वनहंकृतेः त्वं
वशानुवृत्तौ शरभेन्द्रभूपतेः ॥ -८

अत्र वर्ण्यस्य श्रीशरभेन्द्रमहाराजाश्वस्य उपमेयत्वेन मनः परिकल्प्य तेन मनसा 'तव गर्वो न योग्य' इत्यनेन अनादरः प्रतीयत इति ॥

"वर्ण्योपमेयत्वाभेन तथान्यस्याप्यनादरः"

यत्र वर्ण्यस्य उपमानत्वं परिकल्प्य तस्य अन्यदुपमेयमङ्गीकृत्य तस्य वर्ण्येन तिरस्कारः प्रतीयते तत्राऽपि **प्रतीपम्** ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा —

कृत्स्नां व्याप्य वसुन्धरामलघुभिः पादैर्दिवंचोन्नतैः
श्रृङ्गैः अम्बुदसन्निभाः प्रतिदिशं स्थास्याम इत्यद्रिकाः ! ।
गर्वं मा कुरुताऽद्य सन्ति बहुशः श्रीचोलभूमीश्वर-
द्वार्येव अलघुमस्तकाः करिवराः कालाम्बुदश्यामलाः ॥

अत्र वर्ण्यानां श्रीशरभेन्द्रमहाराजगजानां उपमेयत्वेन कल्पितानां पर्वतानां 'गर्वं मा कुरुत' इत्यनेन अनादरः प्रतीयत इति ॥

"वर्ण्येनाऽन्यस्योपमायाः अनिष्पत्तिवचश्च यत"

यत्र वर्ण्येन उपमेयेन उपमानत्वेन प्रसिद्धस्यैव उपमायाः अनिष्पत्तिवचः उपमानमपि वस्तुतोपि अस्य उपमेयार्हतां न प्राप्नोतीति वर्णनं तत्राऽपि **प्रतीपम्** ।

यथा वा —

सदृश इति शशाङ्कं वक्ति लोको 'बुधो' यः
शरभभुवनपालस्योरुकीर्तेरजस्रम् ।
सुरतरुमिति तुल्यः तस्य बाह्वोः पयोधिं
सम इति च दयालोरुर्वपाङ्गस्य भूमौ ॥ -१०

अत्र य एवं वक्ति स बुध इत्युक्त्या कीर्त्यादीनां उपमानतायाः शशङ्कादीनां अनुत्पत्तिवचनादिति ।

"प्रतीपमुपमानस्य कैमर्थ्यमपि मन्वते"

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यत्र उपमेयेन उपमानस्य कैमर्थ्यं निष्प्रयोजनत्वं मन्यते तत्राऽपि प्रतीपम् ।

यथा वा —

किं कर्णेन महीरुहा च मणिना क्षीराब्धिजातेन किं ?
दृष्टे श्रीशरभेन्द्रभूपतिमणौ इष्टार्थदातर्यलम् ।
ज्ञाते चेन्महती प्रतापयशसो किं कारणाभ्यां भवेत्
तेषां यस्य यदा वचः श्रुतिगतं पीयूषवृन्देन किम् ? ॥

अत्र वर्ण्यत्वेन प्रसिद्धानां श्रीशरभेन्द्रमहाराजतदीयप्रतापादीनां उपमानत्वेन प्रसिद्धाः ये कर्णादयः तेषां 'किमि' त्यनेन कैमर्थ्यमुच्यत इति ।

॥ इति गुणरत्नाकरे प्रतीपप्रकरणम् ॥

(७)

## ॥ अथ रूपकाणि ॥

"विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत् ।
रूपकं तत्त्रिधाऽऽधिक्यन्यूनत्वानुभयोक्तिभिः ॥"

यत्र विषयस्य उपमेयस्य, विषयिणा उपमानेन, अभेदरञ्जनं, ताद्रूप्यरञ्जनं च तत्र रूपकम् । तथा च रूपकं द्विविधं - अभेदरूपकं, ताद्रूप्यरूपकं चेति । उभयमपि, प्रत्येकं । त्रिविधं-आधिक्य,

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

न्यूनत्वानुभयोक्तिभेदात् । तथा च रूपकं संक्षेपतः षड्विधम् —
१) अधिकाभेदरूपकं २) न्यूनाभेदरूपकं, ३) अनुभयाभेदरूपकं, ४) अधिकताद्रूप्यरूपकं, ५) न्यूनताद्रूप्यरूपकं, ६) अनुभय-ताद्रूप्यरूपकं चेति । एतेषां क्रमेण उदाहरणानि ।

यथा वा —

अधिकाऽभेदरूपकम् (१) —

कोपाद्विप्रकृतान् अशेषविबुधानालक्ष्य दक्षाध्वरे
भूत्वा श्रीशरभेन्द्रभूपतिसगित्वेनैव भूम्यां पुनः ।
हित्वा तं परिरक्षसीश ! बहुशः कारुण्यपूर्णेक्षणात्
किं ब्रूमः, तव, देव ! शङ्कर ! दयापूर्णत्वमिष्टेप्सलम् ॥

अत्र वर्णनीयस्य राज्ञः उपमानभूतात् शङ्करात् अभेदमुक्त्वा तदपेक्षया कोपरहितत्वदयापूर्णदृष्टिपूर्णाऽऽधिक्य वर्णना( दपि ) —

अधिकाऽभेदरूपकम् (२) —

कृत्वा सतो दूरत एव पालयन्
सुहृज्जनान् भूमिधरान् विपक्षकान् ।
कुर्वन्निलायामपि मानुषाकृतिं
दधान इन्द्रोऽस्ति हि चोलविष्टरे ॥ -१२

अत्र इन्द्रः चोलविष्टरेऽस्तीत्युक्त्या उपमानभूतात् दिव्यमूर्तेः इन्द्रात् उपमेयस्य चोलसिंहासनस्य श्रीशरभेन्द्रमहाराजस्य अभेदमुक्त्वा,

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

'मानुषाकृतिं दधान' इत्युक्त्या तन्न्यूनत्ववर्णनात् न्यूनाभेदरूपकम् ।

तथा च ।

विलसति ननु भूम्यां कीर्तिचन्द्रे, बुधानां
हृदयजलधिरपि प्रोन्नतिं कैरवाणि ।
विकसनमनुजग्मुः लोचनाख्यानि तेषां
शरभभुवननाथस्येष्टमापुः मनांसि ॥ -१४

अत्र उपमेयभूतायाः कीर्तेः उपमानभूतात् चन्द्रात् आधिक्यन्यूनत्वयोः अवर्णनात् तदभेदप्रतिपादनाच्च, अनुभयाभेदरूपकम् ॥

सौधाग्रे काचिदिन्दुं कुसुमशरहतोद्वीक्ष्य कस्मात्पुरस्तात्
सम्प्राप्तः कृत्यमस्मात् किमिह वद सखीत्यब्रवीत्
सा तु चन्द्रम् ।
आचष्टऽऽनन्दहेतुं शरभनरपतेरास्यचन्द्रो विधत्ते
सौख्यं मे कार्यमस्मात् न च रचय मतिं
धिःक्रियार्हेऽब्रवीत्ताम् ॥ -१५

अत्र वर्णनीयस्य राजमुखेन्दोः नायकयानन्ददत्वरूपधर्मस्य उपमानचन्द्राऽवृत्तिनः आधिक्यहेतोः उपादानात् ताद्रूप्यवर्णनाच्च अधिकताद्रूप्यरूपकम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

किञ्च ·

वितन्वन्ती कान्तातटिदिह दृगिन्दीवरमुदं
परित्यज्य स्वीयां प्रघनपटलीमम्बरतटे ।
विराजन्ती कान्त्या सपदि दधती सुन्दरवपुः
परा सौधागारे लसति शरभक्ष्मापतिमणेः ॥ -१६

अत्र कान्तातटितः तटितोऽपि प्रघनपटलीपरित्यागपूर्वकं सुन्दरशरीरवत्त्वरूपाधिक्यवर्णनात् उपमेयस्य उपमानाधिक्यं प्रतीयत इति अधिकताद्रूप्यरूपकम् ।

अन्येयमसितापाङ्गा रम्भा नैवोरुसम्भवा ।
जम्भारिमिह सन्त्यज्य भजते चोलभूमिपम् ॥ -१७

अत्र उपमेयभूतायाः नायिकायाः उपमानभूतरम्भायाः अन्या रम्भा इत्येनेन ताद्रूप्यमुक्त्वा नैव ऊरुसम्भवा इत्यनेन तन्न्यूनत्ववर्णनात् न्यूनताद्रूप्यरूपकम् ॥

लसति मुखशशाङ्के कामिनीनां दृगब्जे
पृथुतमकुचचक्रे चन्द्रपाथोजचक्रैः ।
भवति किमिह साध्यं नैव सिद्धं पुरा तैः
सपदि पुरवरेऽस्मिन् चोलदेशाधिपस्य ॥ -१८

CC-0. SaTasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अत्र 'मुखशशाङ्क' इत्यनेन उपमेयानां मुखादीनां उपमानभूत-चन्द्रादितादूप्यस्य तेभ्यः न्यूनत्वाधिक्ययोः अवर्णनात् **अनुभयताद्रूप्य-रूपकम्** ॥

॥ इति श्री गुणरत्नाकरे रूपकप्रकरणम् ॥

****

अथ परिणामालङ्कारः –

"परिणामः क्रियार्थश्चेद्विषयी विषयात्मना"

यत्र विषय्युपमानं स्वतस्समभिव्याहृतक्रियान्वययोग्यताविरहं सत् विषयात्मना उपमेयात्मना क्रियायामन्वेति तत्र **परिणामालङ्कारः** ।

यथा वा –

दातुः श्रीशरभेन्द्रभूपतिमणेः पाण्यात्मतां पङ्कजं
संप्राप्यैव ददाति रत्ननिचयं तच्चैव नेत्रात्मताम् ।
लब्ध्वैवाशु निरीक्ष्य सर्वविबुधान्पुष्णाति भूयस्सुधा
वागात्मत्वं अवाप्य कर्णयुगलानन्दं ददाति स्फुटम् ॥

अत्र जलजादीनां विषयिणां विषयभूतबाह्वाद्यात्मकत्वेनैव स्वसमभिव्याहृतदानादिक्रियायां अन्वयात् इति ॥

अथ उल्लेखालङ्कारः –

"बहुभिर्बहुधोल्लेखात् एकस्योल्लेख इष्यते"

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यत्र एकस्यैव वस्तुनः बहुभिः स्वोचितधर्मैः बहुधा उल्लेखः, तत्र उल्लेखालङ्कारः ।

यथा वा –

वधूटी कन्दर्पं, कमलभवनं वैदिकजनः
शशाङ्कं सन्तप्तो, द्युमणितनयं चाऽर्थिजनता ।
विपक्षी कीनाशं, धनुषि निरतः शक्रतनयं
वदत्येनं साक्षाच्छरभधरणीपालकमणिम् ॥ -२०

अत्र एक एव श्रीशरभधरणीपालकमणिः । वधूट्यादिभिः (बहुभिः) कन्दर्पत्वाद्यनेकधर्मैः ज्ञात इति ॥

"एकस्य बहुधोल्लेखेऽप्यसौ विषयभेदतः"

यत्र एकस्यैव वस्तुनः विषयभेदेन एकेनैव बहुधोल्लेखः तत्राप्युल्लेखालङ्कारः ।

यथा वा –

दातृत्वे रविजं वदन्ति जनतानन्दैकदाने विधुं
लोकानां परिपालने रघुवरं सर्वार्थसंवेदने ।
गौरीशं रिपुभेदने च वचने देवेड्यमिन्द्रात्मजं
शौर्ये त्वां शरभेन्द्रभूपतिमणे तत्वार्थसंवेदिनः ॥ -२१

अत्र एकस्यैव राज्ञः दातृत्वाद्यनेकविषयेषु रविजत्वाद्यनेक-प्रकारेण एकेनैव बहुधोल्लेख इति ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अथ भ्रान्तिमदलङ्कारः –

भूम्नि प्रतापे शरभेन्द्रभूपतेः
दिवानिशं सम्प्रति जृम्भमाणे ।
स्वमित्रबुद्ध्या विकसन्ति निर्वृतेः
सर्वाणि रात्रावपि पङ्कजानि ॥ -२२

अत्र प्रतापे पङ्कजानां स्वमित्रसूर्यभ्रान्त्या रात्रावपि विकासोक्तेर्भ्रान्तिमदलङ्कारः ।

अथ सन्देहमदलङ्कारः -

किं पद्मं किमु पल्लवम्सुरतरोः किं वा निदानं श्रियः
सङ्ख्यावद्धलयस्य कीर्तिशशिनः किं वा पयोवारिधिः ।
दातुः श्रीशरभेन्द्रभूपतिमणेः किं पाणिरीशो हरिः
सार्वज्ञ्यात्परिपालनात्किमथवा श्रीचोलभूमीश्वरः ॥ -२३

अत्र वर्णनीयराजकरे कुशेशयत्वाद्यनेककोटिकः सन्देहः, तथा तस्मिन्नेव राज्ञि सार्वज्ञ्यादिभिः ईशत्वाद्यनेककोटिकः संशय इत्यत्र सन्देहमदलङ्कारः ।

अथ स्मृतिमदलङ्कारः –

प्रफुल्लजलजं विधुं मुकुरबिम्बमापश्यतः
प्रसन्नवदनं मनो मिहिरवंशमुक्तामणेः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सुवर्णगिरिमुन्नतं सुरतरुं च तं गाहते
महान्तममितप्रदं शरभरत्नगर्भाधिपम् ॥ -२४

प्रफुल्लपद्मावलोकनेन तत्सदृशस्य श्रीशरभेन्द्रमहाराजस्य यत्प्रसन्नं मुखं तस्य तथा मेरुकल्पतरुसंवीक्षणेन महितस्यामितप्रदस्य राज्ञः स्मरणमित्यतोऽत्र स्मृतिमदलङ्कारः ।

अथ अपह्नुतयः –

" शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः "

यत्रान्यधर्मप्रकारकज्ञानोत्पत्त्यर्थं तत्र बुद्ध्या संभावितानां धर्माणां निह्नवः प्रतीयते तत्र शुद्धापह्नुतिः ।

यथा वा –

भूभागं केचिदाहुः कनकरजतयोः कार्यमित्यन्य आहु-
र्ब्रह्माण्डं दीयमानं पुरटमयमतो हेमगर्भप्रदानात् ।
पश्चाज्जातं वदामो न भवति कृतकं कारणाद्भिन्नरूपं
हेम्नां नैवास्ति लाभः शरभनरपतौ रत्नगर्भाधिपेऽस्मिन् ॥

अत्र राज्ञा दीयमाने ब्रह्माण्डे ब्रह्माण्डपदप्रयोगेन बुद्ध्या सम्भावितानां भूभागत्वादि धर्माणां केचिदाहुरित्यादिनापह्नुतिः प्रतीयत इति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

किञ्च ।

पुण्यं कारणमाहुरत्र तपनातापे द्विजानां गवां
केचित्पङ्कजबान्धवस्य बहुशो लज्जां वदामो वयम् ।
सत्येवं मयि गोगणे निजकरैरादान एवातुरो
भूयो गानिचयस्य दातुमनलं दाता हि चोलाधिपः ॥ -२६

अत्र तपनकृततापाभावस्य पङ्कजबान्धवसम्बन्धिलज्जापूर्वकत्वरूप-धर्मारोपार्थं तत्र बुध्या सम्भावितधार्गोपुण्यपूर्वकत्वब्राह्मणपुण्यपूर्वकत्वरूप-धर्मयोर्निह्नुतिः प्रतीयत इति ।

"स एव युक्तिपूर्वश्चेदुच्यते हेत्वपह्नुतिः"

यत्रान्यधर्मारोपार्थं तस्मिन्धर्मिणि सम्भावितानां धर्माणां युक्त्या निह्नवः प्रतीयते तत्र हेत्वपह्नुतिः ।

यथा वा --

सार्वज्ञात्समगुयेतोऽयमगजाधीशो न लोकावना-
दिन्द्रः, कुब्जगगात्रनैकनिरतस्सन्मोददत्वाच्छशी ।
नित्यं वृद्धियुतः कः एष शरभक्ष्माधीश इत्युद्भवे
प्रश्नस्योत्तरमाह गीस्स्मृतिगता नाविष्णुरित्यादिका ॥ -२७

अत्र वर्णनीये राज्ञि विष्णुत्वाद्यारोपार्थं सार्वज्ञादिहेतुभिः तत्र सम्भावितानां शम्भुत्वादिधर्माणां समदृष्टित्वादियुक्तिभिः निह्नुतेः प्रतीय-मानत्वादिति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

"अन्यत्र तस्यारोपार्थः पर्यस्तापह्नुतिस्तु सः"

यत्र यस्मिन्धर्मिणि सम्भावितानां धर्माणामन्त्रारोपार्थं तस्मिन्नेव निह्नवः प्रतीयते तत्र पर्यस्तापह्नुतिः ।

यथा वा –

गाम्भीर्यं जलधौ विभूतिममराधीशो बलं श्रीधरे
सार्वज्ञं गिरिजाधिपे रविसुते दातृत्वमिन्द्रात्मजे ।
शौर्यं ते विबुधाः वदन्ति शरभक्ष्माधीश्वरो नेक्षितो
यैस्तस्मिन्कथिता गुणा प्रभवितर्यासन्नचैवान्यगाः ॥ -२८

अत्र समुद्रादिधर्माणां गाम्भीर्यादीनां अबुधा वदन्तीत्युक्त्या समुद्रादौ निह्नुतिपूर्वकं तदन्यस्मिन्नृपाज्ञ्यारोपादिति ।

"भ्रान्तापह्नुतिरन्यस्य शङ्कायां भ्रान्तिवारणे"

यत्र विवक्षितार्थादन्यस्य साधारण धर्मज्ञानेन भ्रान्त्या शङ्कायां तादृश भ्रान्तेरपह्नुतिः प्रतीयते तत्र भ्रान्तापह्नुतिः ।

यथा वा –

कोऽयं विद्वन्सुधांशुस्त्रिभुवनमखिलं व्याप्य तिष्ठत्यनङ्कः
कस्माज्जातः पयोधेर्गुरुतमवपुषो नाल्पवार्धिर्निदानम् ।
नैवेन्दुः किन्तु जाता शरभनरपतेर्दानवार्यब्धिवर्या-
त्कीर्तिर्भूयस्त्रिलोक्यां विततिमधिगता राजते मूढ
विद्धि ॥ -२९

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अत्र महादानकर्तुः श्री शरभेन्द्रमहाराजस्य दानोदाब्धेर्जातां सर्वत्र व्याप्तां कीर्तिं दृष्ट्वा चन्द्रत्वेन भ्रान्तमल्पवपुरिदानीं कथं सर्वत्रगोऽभूदस्य गुरुतमवपुषामितो जलधिः कथं कारणमभूदित्याक्षिपन्तं मूढेति सम्बोध्य न परिदृश्यमानोऽर्थः कलङ्की, किन्तु जलधेरप्यनन्ताधिक-परिमाणान्महादानकर्तुर्वर्णनीयस्य राज्ञः दानोदकजलधेः जातः कीर्त्याख्यो महानाश्चर्यकरोऽयमुपलभ्यत इत्यतस्त्वदुक्तशङ्कानवकाशः इति तदीय भ्रान्तेरपह्नवोऽत्र प्रतीयत इति ।

इदं च सम्भावितभ्रान्तिपूर्विकायां भ्रांतापह्नुतावुदाहरणम् ।

कल्पितभ्रान्तिमूला यथा -

सवितस्य भुवनेषु गा द्विजकुलं च सन्तोषय-
न्नवाप्य सुमहद्यशो जगति गोसहस्रोद्भवम् ।
इतीन न च दुर्मतिं रचय चोलभूमीशितुः
समोऽहमिति ना भवान्यदि ददाति तुल्यस्तदा ॥ -३०

अत्र सवितुः भुवनेषु गां प्रसरणकर्तृत्वेन निमित्तेनाहं चोलभूमीश समोऽभवमिति भ्रान्तिं कल्पयित्वा यदि भवान् सहस्रगाः ददाति तदा त्वं तत्तुल्यो भवस्यन्यथा तु नेति तदीयकल्पित भ्रान्तेरपह्नव इति कल्पितभ्रान्तापह्नुत्यलङ्कारः ।

किञ्च -

किं दानानि महन्ति हे क्षितिभृतश्चीर्णानि किं वा बुधा-
युष्माभिः परिपालिताः क्रतुभुजो यज्ञैः किमिष्टं ययुः ।

CC-0 Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यूयं श्रीशरभेन्द्रभूपतिमणेः ! प्राप्तुं न शक्ताः परं
माहात्म्यं क्व च यूयमात्मगुणवाञ्छ्रीचोलनाथः
क्व वा । -३१

यद्यपि परेषां राज्ञां श्रीचोलभूमीश्वरसाम्यं नास्ति एवमेव हि तेऽपि जानन्ति तथापि राजत्वेन, तथा भाववुद्धिं तेषां कल्पयित्वा यूयं क्व च आत्मगुणवान् श्रीचोलनाथः क्ववेत्यनेन तदीयकल्पित भ्रान्तेरपह्नवः प्रतीयते । पूर्वोदाहरणे कल्पितभ्रान्तेः शब्दत उक्तिः, अत्र तु तस्य गम्यत्वमिति भेदो द्रष्टव्यः ।

"छेकापह्नुतिरन्यस्य शङ्कातस्तथ्यनिह्नवे"

यत्र स्वाभिमत यथावस्थितार्थ स्वेनोक्ते तदितरसाधारण धर्मज्ञानेन तदन्यविषयशङ्कायामन्येन कृतायां स्वोक्तस्यैव तथ्यस्य निह्नवः प्रतीयते तत्र छेकापह्नुतिः ।

यथा वा –

निर्वाणहेतुं शरभेन्द्रदेवं
जाने वदन्तीति सखीं स्वनाथम् ।
दृष्ट्वा हरं प्राह शुचिस्मितेन
तथाविधं तत्पुरतो वधूटी ॥ -३२

अत्र नर्मसखीं प्रती रहसि स्वनिर्वाणहेतुत्वेन शरभेन्द्रदेवं वदन्ती काचिद्वधूटी तत्रैव पश्चात्स्वनाथं दृष्ट्वा तत्प्रलोभनाय तत्पुरत

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

एव तादृग्विधत्वेन शब्दत एव शिवं प्राहेत्यनेन पूर्वं स्वोक्तस्य तथ्यस्य निह्नवः प्रतीयत इति ।

"कैतवापह्नुतिर्व्यक्तौ व्याजाद्यैर्निह्नुतेः पदैः"

यत्र व्याजाद्यैः पदैर्निह्नुतेः व्यक्तिः तत्र कैतवापह्नुतिः ।

यथा वा –

शरभेन्द्रमहीपालकरव्याजेन सदारम् ।
अर्थिभ्यः कल्पलतिका ददात्यर्थमभीप्सितम् ॥ -३३

अत्र कल्पलतिका व्याजेनेत्युक्त्या नायं करः, किन्तु कल्पलतिकैवेति निह्नुतेः व्याजशब्देन प्रतीयनेरिति ।

॥ इति श्रीशरभोजिराजगुणरत्नाकरे अपह्नुतिप्रकरणम् ॥

## ॥ अथ उत्प्रेक्षाप्रकरणम् ॥

"सम्भावना स्यादुत्प्रेक्षा वस्तु हेतु फलात्मना"

यत्रान्यस्य अन्यधर्मसम्बन्धनिमित्तेन अन्यदातात्म्यसम्भावना तत्रोत्प्रेक्षा । सा त्रिविधा । वस्तूत्प्रेक्षा, हेतूत्प्रेक्षा फलोत्प्रक्षा चेति । यत्र कस्यचिद्वस्तुनो वस्त्वन्तरतादात्म्यं प्रतीयते तत्र वस्तूत्प्रेक्षा । सा द्विधा उक्तविषयाऽनुक्तविषया चेति । यत्रैकस्यैव वस्तुनो

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वस्तुवन्तरतादात्म्यं प्रतीयते तत्रोक्तविषया । यत्र गम्यमानस्य वस्तुनो वस्तुवन्तरतादात्म्यं प्रतीयते तत्रानुक्तविषया । यत्राहेतोर्हेतुत्वेन सम्भावना तत्र हेतूत्प्रेक्षा । सा द्विधा सिद्धविषयाऽसिद्धविषया चेति । यत्राहेतोरुक्तस्य हेतुत्वसम्भावना तत्र सिद्धविषया । अन्यत्र त्वसिद्धविषया । एवमुत्तरत्रापि । यत्राफलस्य फलत्वेन सम्भावना तत्र फलोत्प्रेक्षा । सा द्विविधा सिद्धविषयाऽसिद्धविषया चेति । एतासां क्रमेण उदाहरणानि –

उक्तविषय वस्तूत्प्रेक्षा –

लसद्विबुधमण्डले कुसुममण्टपे संस्थितं
विचित्रवसनावृतं शशिनिभोरुहीरोज्ज्वलम् ।
प्रसन्नवदनाम्बुजं शरभरत्नगर्भाधिपं
गिरीन्द्रतनयाधिपं सदसि मेनिरे सज्जनाः ॥ -३४

अत्र सज्जनाः शरभरत्नगर्भाधिपं 'गिरीद्रतनयाधिपं मेनिरे' इत्यनेनतदात्मकस्यापि वस्तुनो तदात्मकत्वोत्प्रेक्षणात्, विषयस्य चोपादानात् उक्तविषया वस्तूत्प्रेक्षा ॥

अनुक्तविषया वस्तूत्प्रेक्षा –

महीं दृष्ट्वा सेनां शरभभुवनाधीशितुरिमां
वितन्वन्ती वैषा गगनतलगैः पांसुनिचयैः ।
स्वहस्तैस्तद्योगं ददृश इह सौधाग्रनिलयैः
जनैस्सानन्दं ये करितुरगसंवीक्षणरताः ॥ -३५

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अत्र सेनायां तुरगादिगमनोत्थित पांसुव्याप्तिरूपवस्तुनः तदन्य-भूकर्तृकपांसुरूपकर संश्लेषणतादात्म्यवर्णनात् विषयस्य चूर्णीकर्तृक-व्याप्तेः अनुपादानाच्च अनुक्तविषया वस्तूत्प्रेक्षा !

सिद्धविषया हेतूत्प्रेक्षा –

यशः प्रतापौ शरभेन्द्र ते सुतौ
करोत्थितौ यः प्रथमस्समस्तम् ।
व्याप्यापरं वैरिगणस्थमेव
चकार नीतिर्न नृपेषु विद्यते ॥ -३६

अत्र वैरिवर्गेषु स्वाभाविकेनैव प्रतापस्तिष्ठति न कीर्त्यवदानतया । तत्राहेतोः कीर्तेर्हेतुत्वेन वर्णनाद्विषयस्य यशसः सत्वात् सिद्धविषया हेतूत्प्रेक्षा ।

असिद्धविषया हेतूत्प्रेक्षा --

श्रुत्वा गीश्चरणेभ्यः शरभनरपतेर्हेमगर्भप्रदानं
शब्दभ्रान्त्यामनाथं दिशति तव बलाद्युक्तमीडच्येत इत्थम् ।
एवं सम्भाप्य लक्ष्मीं तव निकटमगात्त्वां निरीक्ष्याथ दत्तं
ज्ञात्वा भ्रान्ता त्वयाभूद्वचसि खलु भृशं
जातलज्जा स्थितासीत ॥ -३७

अत्र वर्णनीयस्य राज्ञः सूक्तिषु स्वाभाविके सरस्वत्यावासे सिद्धे तत्राहेतोस्तदीय लज्जायाः हेतुत्वेनोत्प्रेक्षणात् वस्तुनः तथा सरस्वत्याः लज्जाभावात् असिद्धविषया हेतूत्प्रेक्षा ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सिद्धविषया फलोत्प्रेक्षा —

जनयति न च हेतुः किन्तु मुख्यो निदानं
सदृशमिति सुनीतिस्तार्किकाणां वृथा नो ।
शरभभुवननाथस्योरुदृष्टेः सुकीर्तिः
न खलु कनकवर्णापाण्डुरा मुख्यहेतोः ॥ -३८

अत्र वर्णनीयस्य राज्ञः अपाङ्गकीर्त्योः स्वत एव पाण्डिमा तिष्ठति । तत्र कीर्तिनिष्ठपाण्डिमा नापाङ्गनिष्ठपाण्डिम्नः फलमित्यफलस्य फलत्वेन उत्प्रेक्षणात् विषयस्य पाण्डिम्नश्च सत्वात् सिद्धविषया फलोत्प्रेक्षा ।

असिद्धविषया फलोत्प्रेक्षा —

यशः प्रतापौ दरचक्ररूपौ
दध्रे तयोस्तोलनवाञ्छयाऽजः ।
तस्मिन्न शक्तः शरभाधिपस्य
शिश्ये ततः श्रान्तिनुदे पयोधौ ॥ -३९

अत्र भगवान् स्वत एव क्षीरसमुद्रमधिशेते न दरचक्ररूपयशःप्रतापतोलनजनित श्रमपरिहाराय । भगवतः श्रमस्य गगनकुसुमायमानत्वेन तद्ध्वंसस्याऽसिद्धेः प्रतियोगिनोऽसत्वात् । तथाच शयनाफलस्य श्रान्तिपरिहारस्य शयनफलत्वेन सम्भावनात् विषयस्याऽसिद्धत्वात् असिद्धविषया फलोत्प्रेक्षा ॥

॥ इति श्रीशरभोजिराजगुणरत्नाकरे उत्प्रेक्षाप्रकरणम् ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

## ॥ अथातिशयोक्तिः ॥

" रूपकातिशयोक्तिस्स्यान्निगीर्याऽध्यवसानतः "

विषयनिगरणपूर्वकाऽध्यवसाने निगरणं चोपमेयस्य स्ववाचकशब्दं विना उपमानवाचकशब्देन ग्रहणम् । अध्यवसानमाहार्यं निश्चयः । तथा च यत्रोपमेयस्य स्ववाचकशब्दं विना उपमानवाचकशब्दग्रहणपूर्वकं तदभेदादाहार्यनिश्चयो द्योत्यते तत्र रूपकातिशयोक्तिः ।

यथा वा –

कैलासे भाति विद्युत्तटिनि गिरियुगं तत्परं चन्द्रबिम्बं
तस्मिन्नम्भोजयुग्मं धनुरपि मुकुरे पक्वबिम्बं प्रसूनम् ॥
चाम्पेयं तत्परस्तादलिकुलसाधिकं सन्ति कुर्वन्ति पद्मा-
दुत्पन्नाः खेचराणामपि हृदयरुजं मार्गगाः पत्तनेऽस्मिन् ॥

अत्र उपमेयभूतानां मौल्यादीनां उपमानकैलासादिशब्दग्रहणपूर्वकं तदभेदाध्यवसानात् रूपकातिशयोक्तिः ।

अपह्नुतिगर्भा –

" यद्यपह्नुतिगर्भत्वं सैव सापह्नवा मता "

यद्यत्रापह्नुतिगर्भत्वमस्यास्तत्र सापह्नवा सैव मता ।

यथा वा –

मेरोः कल्पतरुर्नचैव जलधेः पद्मं ततो नाम्भसो
जातं शीतकरो बभूव जलजान्नाब्धेस्त्रिलोक्यां शशी ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तिष्ठन्त्यम्बरमात्रगो न विबुधा जानन्ति चोलेश्वरं
वक्षन्तीत्थमितोन्यदाहुरपरे मूढाग्रहास्ते मताः ॥ -४१

अत्र निगरणपूर्वकं राजशय एवार्थ्यर्थकल्पको न सन्तान इत्यतिशयोक्तिः । जलवर्जातः सन्तानो नार्थ्यर्थकल्पकस्तरुः, किन्तु मेरुरूपराजकर एवेत्यपह्नुतिगर्भा ।

भेदकातिशयोक्तिः —

" भेदकातिशयोक्तिस्स्यात्तस्यैवान्यत्ववर्णनम् "

यत्रैकजातीयानेकगुणवतां मध्ये एकस्य तेनैव गुणेनान्येभ्यो वैलक्षण्यं वर्ण्यते तत्र भेदकातिशयोक्तिः ।

यथा वा —

ररक्षुरखिलां क्षमां पृथुमुखास्तु कर्णादयो
धनानि ददुरञ्जसा शरभरत्नगर्भाधिपः ।
समो भवति किं तयोः क्षितिभुजां महान्पालने
वदान्यकुलशेखरः सकलधर्मसंत्रास भूः ॥ -४२

अत्र वर्णनीयस्य राज्ञः भूपालकत्वेन प्रसिद्धानां पृथ्व्यादिचक्रवर्तिनां दातृत्वेन सम्मतानां कर्णादीनां च मध्ये पालने महान्वदान्यकुलशेखरः इत्याद्युक्त्या तत्साम्यनिषेधपूर्वकं ताभ्यां गुणाभ्यामेव वैलक्षण्यावर्णनात् ।

सम्बन्धातिशयोक्तिः —

' सम्बन्धातिशयोक्तिस्स्यादयोगे योगकल्पनम् '

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यत्र तद्धर्मायोग्ये वस्तुनि तद्धर्मयोगः कल्प्यते तत्र सम्बन्धातिशयोक्तिः ।

यथा वा –

जटातटनिवासिनी सुरतरङ्गिणी धूर्जटेः
धनानि शरभेशितुर्दिशत आत्मगोधारया ।
प्रशुष्यति गतोदका गिरिसुतेति तोषं वहु
प्रयाति निजवल्लभप्रियतमेति तां जानती ॥ -४३

अत्र सर्वदा हरजटाजूटनिवासिन्याः सम्पूर्णोदकायाः सुरतरङ्गिण्याः श्रीशरभेन्द्रमहाराजकृतमहादानार्थनाहरणेन हेतुना प्रशुष्कत्वयोगवर्णनात् ॥

असम्बन्धातिशयोक्तिः –

“योगेऽप्ययोगोऽसम्बन्धातिशयोक्तिरितीर्यते”

यत्र तद्धर्मयोग्ये वस्तुनि तद्धर्मायोगो वर्ण्यते तत्राऽसम्बन्धातिशयोक्तिः ।

यथा वा –

सति शरभमहीन्द्रे नार्थितार्थतार्थस्य दास-
यमरुतरुमणी गां कामदोग्ध्रीं सकर्णाम् ।
जडपशुकुलदूष्यां नार्थयामोऽर्थसिद्ध्यै
सुरसरिति जलार्थी याचते कन्नु कूपम् ॥ -४४

 T. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अत्र नार्थितार्थप्रदानयोग्येषु कल्पवृक्षादिषु नार्थयाम इत्यनेन नार्थितार्थप्रदातृत्वायोगोक्तेः ।

अक्रमातिशयोक्तिः –

"अक्रमातिशयोक्तिस्स्यात्सहत्वे हेतुकार्ययोः"

यत्र कार्यकारणयोः समानकालावच्छेदेन उत्पत्तिः तत्राक्रमातिशयोक्तिः । कार्यस्य कारणानन्तरमेवोत्पत्तिः हि क्रमः, तदुल्लङ्घने ऽक्रम इति ।

यथा वा –

ज्यातलाग्रमवलम्ब्य मार्गणे
तिष्ठतीह रिपुमण्डलं रणे ।
भास्वदङ्गमनुगच्छति स्म चेत्
भोसलान्वयमणेर्महीभुजः ॥ -४५

अत्र यदा धनुषि शरसन्धानं शरस्य च रिपूणामङ्गप्रवेशश्च तदैव तेषां स्वदेशाप्रवासः सूर्यं प्रति गमनं चेति कार्यकारणयोस्सहभावप्रतितेरिति —

चपलातिशयोक्तिः –

"चपलातिशयोक्तिस्तु कार्ये हेतुप्रसक्तिजे"

यत्र हेतुप्रसक्तिमात्रेण कार्योत्पत्तिः तत्र चपलातिशयोक्तिः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा –

याञ्जेतुं मनसावगच्छति जयी राज्ञस्तदा निर्जिताः
सेवन्ते कुटभूषणाः किसलयान्यास्वाद्य कान्ताजनैः ।
कान्तारं परिरक्षितुं च नृपतीञ्जानात्यसौ यान्पुरीं
ते सानन्दमहीनरत्नमकुटाः श्रीचोलभूमीश्वरः ॥ -४६

अत्र चोलेश्वरकर्तृक निग्रहानुग्रहप्रसक्तिमात्रेण परेषां राज्ञां विपत्सम्पत्स्वरूपकार्ययोरुत्पत्तेरभिधानादिति ।

अत्यन्तातिशयोक्तिः —

"अत्यन्तातिशयोक्तिस्तु पौर्वापर्यव्यतिक्रमे"

अत्र कारणकार्ययोः पौर्वापर्यव्यतिक्रमः तत्रात्यन्तातिशयोक्तिः ।

यथा वा –

त्यजन्ति मदगर्विता अपि वसूनि राजन्यकाः
महीं च समरोद्यमात्पुरत एव चोलेशितुः ।
निरीक्ष्य रिपुभीषणं मिहिरनन्दनादप्यमुं
दिनेशमनुयान्ति ते शरणमाशु खड्गक्षतात् ॥ -४७

अत्र समरोद्यमखड्गक्षतरूपकारणाभ्यां पूर्वमेव तत्कार्ययोः धनत्यागदिनेशप्राप्त्योः जननाभिधानादिति ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सहोक्तिः –

"सहोक्तिस्सहभावश्चेद्भासते जनरञ्जनः"

यत्र जनरञ्जनः सहभावः भासते चेत्तदा सहोक्तिः ।

यथा वा –

प्राप्तः शत्रुकुलं विपक्षधरणीनाथैस्समं सोऽग्रजं
गच्छन्तं प्रययौ दिगन्तमनुतं ज्ञात्वा वरिष्ठस्सुतः ।
नीतिं स्वामनुसृत्य भोः शरभभूनाथेन्द्र बाहाञ्चलं
स्वेष्टं तस्य ददौ निवासधरणीं न्यायोऽस्ति भूमीश्वरे ॥

अत्र दिगन्तं गच्छन्तं वरिष्ठसुतंकीर्त्याख्यमनु तदनुजः प्रतापाख्यः विपक्षधरणीनाथैस्समं जगामेति जनरञ्जनतया सहभावोपलब्धेरिति ।

किञ्च ।

लोके कीर्तिस्त्वदीया विमतवसुमतीनायकान्मोहयित्वा
तैस्साकं सप्तवार्धीञ्छरभनरपतेतूर्णमालङ्घ्यपश्चात् ।
भित्वा ब्रह्माण्डभाण्डं बहिरपि बहुशो नैव संवीक्ष्य तेषां
स्थानं श्रीमत्प्रतापैर्विरहितमधिकं राजतेऽशेषमित्थम् ॥

अत्र वर्णनीयस्यराज्ञः कीर्तेः विमतवसुमतीनायकानां च सहभावः उपलभ्यत इति ।

विनोक्तिः –

"विनोक्तिश्चेद्विना किञ्चित्प्रस्तुतं हीनमुच्यते"

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यत्र प्रस्तुतं किञ्चिद्विना हीनमुच्यते तत्र विनोक्तिः ।

यथा वा –

विना सभां चोलमहीश्वरस्य ये
बुधाश्चरन्त्यन्यनराधिपान्प्रति ।
बुधत्वमेषां स्वफलं किमाव्रजेद्-
वृथैव विद्याधिगतौ परिश्रमः ॥ -५०

अत्र चोलमहीश्वरस्य सभाप्रवेशं विना अन्यराजसभाप्रविष्टानां बुधानां विद्याया हीनत्वं विना शब्देन गम्यत इति ।

"तच्चेत्किञ्चिद्विना रम्यं विनोक्तिस्सापि कथ्यते"

यत्र प्रकृतं किञ्चिद्विना रम्यं भवतीत्युक्तिः तत्रापि सोक्तिर्विनोक्तिरिति कथ्यते ।

यथा वा –

निन्द(न्ति) ये सुकृतिनः सदसि प्रभूणां
ये डाम्भिकाश्च विबुधा इव मन्यमानाः ।
स्वात्मानमल्पमतयश्च विना विमूढै-
स्तैश्चोलविष्टरपतेस्सुसभा विभाति ॥ -५२

अत्र वर्णनीयस्य राज्ञः वर्णनीयत्वेन प्रकृतायाः सभायाः उक्तैर्विना रम्यत्वं प्रतिपाद्यत इति ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

## समासोक्तिः

"समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत्"

यत्र प्रस्तुते वर्ण्यमानेऽप्रस्तुतस्य लिङ्गसाधारणधर्मादिभिः परिस्फूर्तिः तत्र समासोक्तिः ।

यथा वा ।

विद्युल्लतेव गगने परिवर्तमाना
सन्मोदमाशु दधती सुहृदां कृपाणी ।
श्यामाकृतिं च कनकोज्ज्वलकामदात्री
चोलावणीन्द्रकरपद्मगता विभाति ॥ -५.२

अत्र प्रस्तुत चोलावनीन्द्रकृपाणीवृत्तान्ते कथिते लिङ्गविशेषणादि-सामर्थ्यादप्रस्तुतविपरीतरतासक्तनायकावृत्तान्तोऽपि कथितो भवतीति ॥

विशेषोक्तिः –

"कार्याऽजनिर्विशेषोक्तिः सति पुष्कलकारणे"

यत्र पुष्कलकारणे सत्यपि कार्यस्यानुत्पत्तिः तत्र विशेषोक्तिः ।

यथा वा —

दुर्गे सत्यपि दुर्गमे गजरथे गन्धर्वमुख्ये तथा
शूराणां निचये विपक्षधरणीनाथस्त्वया विग्रहम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कृत्वा श्रीशरभेन्द्र भूपतिमणे नैवाप्तवानात्मनो
जेतृत्वं जयकारणेषु बहुशश्शस्त्रेषु संस्थेषु च ॥ -५३

अत्र जयपुष्कलकारणेषु गजादिषु विद्यमानेष्वपि तत्कार्यस्य त्वदीयविपक्षक्षितिपसम्बन्धि जयरूपस्यानुत्पत्तिः दृश्यत इति ॥

॥ इति श्री गुणरत्नाकरे उक्तिप्रकरणम् ॥

तुल्ययोगिता —

"वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता"

यत्र प्रस्तुतानामप्रस्तुतानां वा गुणक्रियादिरूपधर्मैक्यं तत्र तुल्ययोगिता ।

यथा वा —

चोलावनीन्द्रवरविष्टरसाश्रितेष्ट-
सन्दोहदे शरभभूपकुलावतंसे ।
प्राप्ते, सुखानि विबुधास्सुहृदश्च शूराः
प्रापुर्धनाभरणजानि महन्ति सर्वे ॥ -५४

अत्र प्रकृतस्य राज्ञः श्रीचोलसिंहासनाधिरोहणसमये अभिषेकार्थे करप्रदानार्थे च प्रकृतानां विबुधानां शूराणां च सुखप्राप्तिरूपधर्मैक्यं वर्तत इति प्रस्तुततुल्ययोगिता ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा —

त्रिलोकिते दातरि कल्पभूजने-
श्चोलावनीन्द्र कलशाब्धिजन्मनि ।
मणौ दिनाधीशसुते च धीमता-
मल्पत्वबुद्धिर्बहुशोऽभिजायते ॥ -५५

अत्र दातृत्वेन वर्ण्यचोलावनीन्द्रादितरयोः चिन्तामणिकर्णयोः अल्पत्वरूपधर्मैक्यं वर्तत इत्यप्रस्तुततुल्ययोगिता ।

"हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता"

यत्र एकस्यैव हिताहितयोर्वृत्तितौल्यं तत्राऽपरा तुल्ययोगिता ।

यथा वा —

ये वै स्तुवन्ति विबुधा धृतमूकभावा-
स्तिष्ठन्ति ये सदसि नैजगुणानुसारात् ।
कुर्वन्ति ये प्रियमहीन धृतेर्धनानि
सम्प्राप्नुवन्ति शरभेन्द्ररसाधिनाथात् ॥ -५६

अत्र लोकदृष्ट्या हिताऽहितेषु आत्मगुणानुसारेण स्तावकनिन्दकेषु बुधेष्वस्य एकप्रकारेण इष्टफलदातृत्वरूपवृत्तितौल्यमिति ।

"गुणोत्कृष्टैस्समीकृत्य वचोऽन्या तुल्ययोगिता"

यत्र गुणोत्कृष्टैः सहवचनं तत्राऽपरा तुल्ययोगिता ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा —

दातार इति विख्याताः कर्णः कल्पमहीरुहः ।
लोके भवानपि श्रीमच्छरभेन्द्रमहीपते ॥ -५७

अत्र वर्णनीयो राजा दातृत्वेन प्रसिद्धाभ्यां कर्णकल्पवृक्षाभ्यां समीकृत इति तुल्ययोगिता ॥

दीपकम् —

"वदन्ति वर्ण्याऽवर्ण्यानां धर्मैक्यं दीपकं बुधाः"

यत्र वर्ण्यावर्ण्ययोः एकः साधारणोधर्मः प्रतीयते तत्र दीपकम् । एकस्यैव दीपस्य रथ्याप्रासादयोः प्रकाशकत्वात् । अत एवास्य दीपकमिति नामाप्यन्वर्थकं भवति ।

यथा वा —

शशाङ्कदलशेखरः शरणमिच्छतामाश्रयो
विभाति धनुषा हरस्त्रिपुरपूर्वदेवाहवे ।
रणेविमतभूभृतामसुहृदेष चोलाधिपो
धृतेन वरमुष्टिना निशितचन्द्रहासेन हि ॥ -५८

अत्र वर्ण्यावर्ण्यराजशिवयोः भानरूपैकधर्मप्रतिभासादिति ।

आवृत्ति दीपकम् —

"त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकम्"



CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यत्र वर्ण्यावर्ण्यसाधारणैकधर्मरूपस्य दीपकस्य शब्दतोऽर्थतः शब्दार्थाभ्यां च आवृत्तिः तत्र आवृत्तिदीपकम् । तत्त्रिविधम् । शब्दावृत्तिदीपकं, अर्थावृत्तिदीपकं, शब्दार्थावृत्तिदीपकं चेति । क्रमेणोदाहरणानि यथा वा —

वहन्ति शिरसा गुणान्बुधजनाः सभामण्डले
सुसंभ्रमममुष्य ये परमतत्त्वसंशोधकाः ।
वहन्ति करमादराद्विमतभूतधात्रीश्वराः
पराभवभयोद्धताः शरभभूभुजे भूरिशः ॥ -५९

अत्र गुणानां शिरसा वहनं शिरः कम्पनेनाभिनन्दनम् । करस्य शिरसा वहनं धारणमित्यर्थभेदात् शब्दस्यैवावृत्तिः । वर्णनीयत्वं गुणानामिति वर्ण्यावर्ण्यसाधारण्यं चेति ।

यथा वा —

कुसुममार्गणगोगणलक्षतां
विरचयन्तममुं मदिरेक्षणाः ।
प्रतिसमीक्ष्य मुखं ययुरर्थिनः
प्रमुदिताः कमलेक्षणपात्रताम् ॥ -६०

अत्र वर्णनीयानां राजमदिरेक्षणानां तद्दर्शनजनितसुखप्राप्तिरूपार्थस्यावर्णनीयानामर्थिनां प्रमुदिता इत्यनेन आवृत्तेरर्थावृत्तिदीपकम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा –

समागते श्रीशरभेन्द्रभूपतौ
चोलावनीन्द्रस्य वरासनेशताम् ।
प्रापुः सुखं भूरि तमाश्रिता नृपाः
प्रापुर्विपक्षक्षितिपास्तदाह्यवम् ॥ -६१

अत्राश्रितनृपाणां विपक्षक्षितिपानां चेष्टानिष्टप्राप्तेः शब्दार्थाभ्यामावृत्तेः शब्दार्थावृत्तिदीपकम् ॥

प्रतिवस्तूपमा –

"वाक्ययोरेकसामान्ये प्रतिवस्तूपमा मता"

यत्र उपमानोपमेयवाक्ययोरेकः साधारणो धर्मः पृथग्भिन्नपदाभ्यां निर्दिश्यते तत्र प्रतिवस्तूपमा । प्रतिवस्तु प्रतिवाक्यं उपमासमानो धर्मोऽस्यामिति व्युत्पत्तेः ।

यथा वा –

कोपं नचाप्नोति विकत्थितोप्यसौ
द्विजन्मना श्रीशरभेन्द्रभूपतिः ।
स्वात्मानमालोक्य विनोदिने रदैः
डिम्भाय किं क्रुध्यति पूर्णचन्द्रमाः ॥ -६२

अत्र उपमानोपमेयवाक्ययोरेकः कोपाभावरूपो धर्मःपृथग्भिन्नपदाभ्यां निर्दिष्ट इति । क्वचिद्वृच्यतिरेकेणापि इयं प्रतिवस्तूपमा दृश्यते ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा –

सारासारविवेकिनस्सुकृतिनः श्रीचोलभूमीशितुः
जानन्त्यात्मगुणान्नचेतरजनास्स्थूलार्थ संवेदिनः ।
जात्यन्धाः किमु रत्नमार्गणकृतौ रत्नाकरे पण्डिताः
शाक्तेयाः किमु देवनाथपदवीं गन्तुं तथा वेदितुम् ॥

दृष्टान्तोपमा –

" यद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृति "

यत्र उपमानोपमेयवाक्ययोर्भिन्नावेव धर्मौ बिम्बप्रतिबिम्बभावेन निर्दिष्टौ तत्र दृष्टान्तः । वस्तुतो भिन्नयोरुपमानोपमेयधर्मयोः परस्पर-सादृश्यादभिन्नयोः पृथगुपादानं बिम्बप्रतिबिम्बभावः ।

यथा वा –

त्वमेव विक्रान्ति महत्कुलाग्रणीः
श्रीचोलभूमीश्वरसिन्धुमध्यभूः ।
स एव यश्शीतकरस्सुधाकरः
सन्त्वन्यभूपा जलजाश्च जन्तवः ॥ -६४

अत्र त्वमेव विक्रान्तिमहत्कुलाग्रणीः यश्चाब्धि मध्यभूः शीतकिरणः स एव सुधाकरः इति विक्रान्तिमहत्कुलाग्रणित्वसुधा-करत्वयोः बिम्बप्रतिबिम्बभावोपलब्धेर्दृष्टान्तालङ्कारः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

निदर्शनालङ्कारः —

"वाक्यार्थयोस्सदृशयोः ऐक्यारोपो निदर्शना"

यत्र सदृशयोराकरूपयोरुपमानोपमेयवाक्यार्थयोरैक्यारोपः प्रतीयते तत्र निदर्शनालङ्कारः ।

यथा वा –

समाश्रितो यश्शरभेन्द्रभूपतिं
तेनाश्रितः क्षीरपयोधिमध्यभूः ।
सुधाकरस्तापहृतौ सुरद्रुमः
स्वनाश्रितार्थप्रचयप्रदोहने ॥ -६५

अत्र श्रीशरभेन्द्रमहाराजाश्रितस्य तापहरणादिविषये चन्द्राद्याश्रितस्य च यत्तत्पदाभ्यामैक्यारोप इति ॥

"पदार्थवृत्तिमप्येके वदन्त्यन्यां निदर्शनाम्"

यत्र उपमानोपमेययोः विद्यमानयोः पदार्थयोः एकस्यान्यत्रारोपस्तत्राप्युक्तविलक्षणा निदर्शना ।

यथा वा –

माधुर्यं तव वाचि यद्विलसति श्रीचोलभूमीशितुः
भातिश्रीशरभेन्द्रभूपतिमणे तच्चामृताम्भोनिधौ ।
पद्मेष्वप्यधिका चकास्ति वदने सा श्रीर्विकासाभिधा
तिष्ठत्यष्टदिगन्तराललसितात्युद्दामकीर्तिप्रभो ॥ -६६

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अत्र उपमेयोपमानयोः विद्यमानयोः पदार्थयोर्माधुर्यप्रसन्नत्वरूप-धर्मयोः एकनिष्ठस्यान्यस्मिन्नध्यासः प्रतीयते । तत्रापि पूर्वार्धेहृद्युपमेय-वाङ्निष्ठस्य माधुर्यरूपस्य पदार्थस्य उपमाने सुधाब्धावारोपः । उत्तरार्धे तु उपमानपद्मनिष्ठस्य प्रसन्नत्वरूपपदार्थस्य उपमेयमुखे इति विशेषोऽव-गन्तव्यः ।

"अपरं बोधनं प्राहुः क्रिययाऽसत्सदर्थयोः"

एक क्रियाविशिष्टस्य कस्यचिद्वस्तुनः तादृशक्रियया परान्प्रत्यसतः सतोवार्थस्य बोधनं यत्र प्रतीयते तत्रापरां निदर्शनां प्राहुः ।

यथा वा –

चोलावनीन्द्रस्य मृगेन्द्रविष्टरं
समाश्रिते श्रीशरभेन्द्रभूपतौ ।
विपक्षिणां तत्क्षणतः प्रतिष्ठितो
जज्वाल पूर्वैर्हृदये तनूनपात् ॥ -६७

अत्र वर्णनीयो राजा यदा चोलसिंहासनकर्मकारोहणरूप-क्रियावान् तदैव विपक्षक्षितीश्वराणां हृदये यश्चिरन्तनैश्चोलसिंहासनारूढैः नृपैः प्रतिष्ठितः तनूनपात् स जज्वालेत्यसतो निष्ठस्य परान् राजद्वेषिणः प्रति स्वक्रिययाबोधनादसद्बोधनरूपा अन्या निदर्शना ।

यथा वा –

अहिमगुवरवंशप्राप्तजन्मा यदाभू-
च्छरभभुवननाथः क्ष्मापतिश्चाश्रितेषु ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्रियमधिकमलभ्यामर्पयत्यस्य को ? वा
गुणगणनपटीयानादिशेषोऽपि नालम् ॥ -६८

अत्र यदा वर्णनीयो राजा सूर्यवंशजननरूपक्रियावान्, तदैवा-श्रितेषु क्षितिपेषु अलभ्यां श्रियं अधिकमर्पयतीत्यनेन स्वक्रियया सत इष्टस्य परान्प्रत्याश्रितान् बोधनात् सद्बोधनरूपाऽपरा निदर्शना ।

व्यतिरेकालङ्कारः –

"व्यतिरेको विशेषश्चेदुपमानोपमेययोः"

यत्रोपमानात् उपमेयस्य विशेषः प्रतीयते तत्र व्यतिरेकालङ्कारः । विशिष्यते अनेनेति विशेषो व्यावर्तकधर्मः ।

यथा वा –

गोभृद्वृषाश्रयः सोमलोचनश्चोलभूपते ।
त्वं च शम्भुर्यतस्तस्मै वृषदोऽसि ततोऽधिकः ॥ -६९

अत्र उपमानभूताच्छिवात् उपमेयस्य राज्ञः शिवाय वृषदत्वरूप-विशेषवर्णनमिति ।

किञ्च ।

भास्वन्गोगणसंवृतोऽपि न च गामेकां द्विजेभ्यः पुरा
दत्वा नैव यशस्त्वयार्जितमहो त्वद्वंशजान्यैरपि ।
श्रीमच्छ्रीशरभेन्द्रभूपतिमणिस्त्वद्वंशजन्माधुना
दत्वा गोनिचयं त्वदीयकुलजाकीर्तिं ह्ययमार्क्षोद्धरः ॥ -७०

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अत्र गोमत्त्वेन उपमानोपमेययोः सूर्यराज्ञोः सूर्यात् उपमानात् उपमेयस्य राज्ञः तत्कुलजाताऽकीर्तिनिवारकत्वरूपाधिक्यवर्णनादिति ।

परिकरालङ्कारः —

"अलङ्कारः परिकरः साभिप्रायविशेषणे"

यत्र साभिप्रायेण विशेषितं विशेष्यमुच्यते तत्र परिकरालङ्कारः ।

यथा वा –

वदान्यवर्यो वरणीयवर्षको
विनिर्जितो यत्करवारिजन्मना ।
रवेस्सुतो मह्यमसावभीप्सिता-
श्रीचोलनाथो दिशतु प्रभूत्तमः ॥ -७१

अत्र श्रीचोलनाथस्य वदान्यवर्यत्वादिविशेषणानि वाञ्छितार्थदान-सामर्थ्याभिप्रायगर्भाणीति ।

परिकराङ्कुरालङ्कारः –

"साभिप्राये विशेष्ये तु भवेत्परिकराङ्कुरः"

यत्र साभिप्रायं विशेष्यं स्फुरति तत्र परिकराङ्कुरालङ्कारः ।

यथा वा –

द्रष्टुं भूतिं त्वदीयां शरभनरपते नायकोऽभूत्सुराणां
सम्प्राप्तस्त्वद्गुणान्वै भणितुमहिपति द्रष्टुमीशौ प्रवक्तुम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नाभूतां तौ सुरेशः पुनरपि तरुणीसङ्गमं गौतमस्य
ध्यायन्नास्ते द्विजानस्त्व हितमपरो लज्जया
विद्रुतोऽभूत् ॥ -७२

अत्र सुरेशाहिपती इति विशेष्ये महदैश्वर्यदर्शने गुणवर्णने च सहस्राक्षत्वसहस्रवदनत्वाभिप्रायगर्भे इति साभिप्रायविशेष्यत्वं संभवतीति ।

नन्वत्र सुरेशाहिपतिशब्दौ एव श्रूयेते । न ताभ्यां सहस्राक्षत्वसहस्रवदनत्वयोः परिस्फूर्तिरिति चेन्न । सुरेशाहिपतिशब्दयोः सहस्राक्षत्वाद्यभिप्रायगर्भत्वाङ्गीकारात्, "फणीन्द्रस्ते गुणान्वक्तुमि" त्यादि-श्लोकमुदाहृत्य कुवलयानन्दे दीक्षितैरित्थमेव व्याख्यानात् ॥

## ॥ श्लेषः ॥

"नानार्थसंश्रयः श्लेषः वर्ण्यावर्ण्योभयास्पदः"

अनेकार्थशब्दविन्यासः श्लेषः । स च त्रिविधः । वर्ण्यानेकविषयः, अवर्ण्यानेकविषयः, वर्ण्यावर्ण्यानेकविषयश्चेति ।

यथा वा —

वर्ण्यानेकविषयः

वृषाकरोऽब्जेक्षणजह्नुकन्यका-
धराकरः कामदभूधराश्रयः ।

 CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

उमानिवासो नितरां तनोतु नः
श्रेयश्शिवो वा शरभेन्द्रभूपतिः ॥ -७३

अत्र दातृत्वेन वर्णनीययोः शिवराज्ञोः श्लेषः । तथा हि - वृषः वृषभः आकरः यस्य सः । अब्जः चन्द्रः स एवेक्षणं यस्य । जन्हुकन्यकाधारायाः आकारः आश्रयः । अब्जेक्षणश्चासौ जह्नुकन्यकाधाराकरश्च अब्जेक्षणजह्नुकन्यकाधाराकरः । कामदः कामो मन्मथः तं द्यतीति कामदः । दोऽवखण्डने । भूधरो हिमवान् स एव आश्रयः यस्य सः । कामदश्चासौ भूधराश्रयश्च कामदभूधराश्रयः । उमायाः पार्वत्याः निवासः शिवः नितरामत्यन्तं श्रेयस्तनोतु । तथा वृषस्य धर्मस्याकरः आश्रयः । अब्जं कमलं तद्वदीक्षणं यस्य सः । जह्नुकन्यकायाः भागीरथ्याः या धारा सैव करे यस्य सः । गङ्गाधारापूर्वकं महादानसमयेऽस्य करे गङ्गाधारायास्सत्वादिति भावः । कामदः काम्यन्त इति कामाः अर्थादयः तान्ददातीति कामदः । दाञ् दाने । भूधराणां राज्ञामाश्रयः राजाधिराज इत्यर्थः । ईदृशः शरभेन्द्रभूपतिः नितरां श्रेयस्तनोत्विति ।

अवर्ण्यानेकविषयः - यथा वा -

कीर्त्या पाण्डुरमाण्डकोशमपरे दूष्यं वदन्त्यत्रगाः
श्रीमन्क्षत्रकुलाब्धिचन्द्रशरभक्ष्माधीश नो शस्त्रिणः ।
धातुस्सम्प्रतिपन्नतामुपगतो दातुं तथा किं भवे-
त्सन्मार्गाभिनिवेशनाप्तसुधियो ज्ञातुं स सर्वैर्बुधैः ॥ -७४

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अत्रावर्णनीयत्वे राज्ञा दीयमानस्वर्णब्रह्माण्डब्रह्माण्डयोः श्लेषः । दीयमानस्यान्यसम्बन्धित्वेनावर्ण्यत्वात् । तथाहि -- अत्रगाः ब्रह्माण्डस्था अपरे जनाः धातुः पालकस्य तव कीर्त्या पाण्डुरं धवलीकृतं आण्डकोशं ब्रह्माण्डं दूष्यं वदन्ति पटगृहं वदन्ति । ते शास्त्रिणः शास्त्राभिज्ञाः नो न भवन्ति । कुतः ? सन्मार्गे सत्स्वभाव-ब्रह्ममार्गे अभिनिवेशनेन प्राप्तसुधियः धातुश्चतुर्मुखस्य सम्प्रतिपन्नता-मुपगतो पटगृहत्वेन शास्त्रभिज्ञतां प्राप्तः सः ब्रह्माण्डकोशो लोके सर्वैर्बुधैः तथा पटगृहत्वेन ज्ञातुं भवेत्किं ? तथा ज्ञातुमयोग्य इत्यर्थः । तथा कीर्त्या राजा स्वर्णमयं ब्रह्माण्डं ददातीति कीर्त्या अपाण्डुरं पाण्डुरभिन्नं पीतमिति यावत् । आण्डकोशं स्वर्णमयं ब्रह्माण्डं दातुमपरे दूष्यं वदन्ति । ते शास्त्रिणः धर्मशास्त्रविमर्शका नो न भवन्ति । "राज्ञां षोडशदानानि नन्दिना कथितानि" इति लिङ्गपुराणवचनेन राज्ञां षोडशमहादानेष्वधिकारात् अस्य तदन्तर्गतत्वात् इति भावः । अपरे वेदोक्तरीत्या दातुं ब्रह्माण्डं नो दूष्यं वदन्ति ते शास्त्रिणो धर्मशास्त्रविमर्शकाः दानकमलाकरादिनिबन्धनेषु तथा श्रवणादिति भावः । कुतः ? सन्मार्गे सदुक्तमार्गेऽभिनिवेशनेन प्राप्तसुधियः धातुः पालकस्य तव दातुं सम्प्रतिपन्नतामुपगतः स ब्रह्माण्डकोशः लोके सर्वैर्बुधैः तथा दूष्यत्वेन ज्ञातुं भवेत्किम् ? तथा ज्ञातुमयोग्य इत्यर्थः । सदुक्तमार्गानुवृत्तिनस्तथायोग्यमार्गे प्रथम मन एव न गच्छति । "प्रायस्सतां न मनः पापमार्गे" इति वचनादिति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

हरिरथमभियातुं प्रोद्यता भूधरेष्ट-
प्रवसति परिरक्षादीक्षितास्स्वर्णकामाः ।
शरभनृपतिपोष्यास्सैनिकाश्शात्रवाश्च
समरभुवनमध्ये भूतिमापुस्स्वयोग्याम् ॥ -७५

अत्र युद्धे वर्णनीयानां शरभेन्द्रमहाराजभटानां अवर्णनीयानां प्रत्यर्थिनृपभटानां च श्लेषः । तथाहि - शरभनृपतिपोष्याः सैनिकाः समरभुवनमध्ये रणरङ्गे स्वयोग्यां भूतिं विजयलक्षणां प्रापुः । कीदृशास्ते ? हरिरथं हरिरश्वः हरिश्च रथश्च हरिरथं, सेनाङ्गत्वाद्-द्वन्द्वैकवद्भावः । तदभियातुं परसैन्यादभिहर्तुं प्रोद्यताः भूधरस्य राज्ञः इष्टा या प्रवसतिः निवासभूः तत्परिरक्षायां दीक्षिता उद्युक्ताः स्वर्णकामाः परसैनिकस्वर्णाहरणकामाः तथा शात्रवाः शत्रुसम्बन्धिनः सैनिकास्तेऽभि समरभुवनमध्ये स्वयोग्यामभूतिं पराजयरूपामापुः । कीदृशास्ते ? हरिरथं हरेः सूर्यस्य रथमभियातुं प्रोद्यताः रणमण्डले मृतानां सूर्यमण्डलप्राप्तिश्रवणादिति भावः । भूधरे पर्वते इष्टा या वसतिः पर्णशालादिरूपा । तत्परिरक्षायां दीक्षिताः । पर्वते कुटबन्धनोद्युक्ता इति यावत् । स्वर्णकामाः "ऋणशब्दो दुर्गभूमौ जले च" इत्यनेन ऋणशब्दस्य जलवाचकत्वात्, तस्य चाङ्पूर्वकत्वे गुणे च, आ ईषत् ऋणमर्णं सुष्टूदीपज्जलकामास्स्वटिता इति यावदिति ॥

## ॥ अप्रस्तुतप्रशंसा ॥

"अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुताश्रया"

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यत्राप्रस्तुतवृत्तान्तवर्णनं प्रस्तुतावगतिपर्यवसायि तत्राप्रस्तुत प्रशंसालङ्कारः ।

यथा वा —

नान्यद्दैवतमादरेण मनसा जानाति भद्राण्यसौ
तेभ्यः कामयते न चैव गिरिजाधीशं विना सेवते ।
गौरीं नापि नमत्यमुं शशिकलाचूडं स्तवीत्यादरा-
द्भृङ्गी शङ्करभक्तिमत्सु भुवनेष्वेकः कृती ज्ञायते ॥ -७८

अत्राप्रस्तुतस्य भृङ्गिणः वृत्तान्तकथनेन तद्वद्यः शिवं विनाऽन्य-दैवतं नोपास्ते तेभ्यः स्वभद्राणि न कामयते, शिवमेव नित्यं नमति स्तुवति च सोऽपि शिवभक्ताग्रणीरिति प्रकृते वर्णनीयत्वेन प्रस्तुतस्य श्रीशरभेन्द्रमहाराजस्य तादृशगुणविशिष्टत्वाच्छिवभक्ताग्रेसरत्वं ज्ञायत इति ॥

प्रस्तुताङ्कुरः —

"प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुताङ्कुरः"

यत्र प्रस्तुते वर्ण्यमाने तत्सादृश्यात् प्रस्तुतान्तरस्य परिस्फूर्तिः तत्र प्रस्तुताङ्कुरालङ्कारः ॥

यथा वा –

जगद्भर्तौ शौण्डतमेऽमरेश्वरे
स्थितेऽद्यां भृङ्गिणि लोकक्रद्धिभौ ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

भवान्करोत्यल्पधृतौ महात्मनां
समाश्रितेष्वेव मनः प्रवर्तते ॥ -७७

अत्र लोककृद्भिर्भो हे देव ! महात्मनां भवादृशानां मनः समाश्रितविषय एव प्रवर्तते न तु पुरुषाकारमपेक्ष्य पुरुषविषये । कुतः ? जगद्धृतौ शौण्डतमे अमरेश्वरे सति अल्पधृतौ भृङ्गिणि यतो भवान्दयां करोत्यत इति । शिवस्तुतौ प्रस्तुतस्य शिवस्य स्वभक्तवश्यत्वरूपं माहात्म्यमनुवर्ण्यते । तेन प्रस्तुताङ्कुरमपि द्योत्यते । तथाहि - हे लोककृद्भिर्भो लोकसंरक्षणविचक्षणश्रीशरभेन्द्रमहाराज जगद्धृतौ शौण्डतमे अमात्यवर्गे सत्यप्यल्पधृतौ भृङ्गी यथा शिवैकाग्रचित्तः तथा त्वदेकाग्रचित्ते मयि भवाननन्यसाधारणां दयां करोतीति यत्तन्महात्मनां चित्तं समाश्रितेष्वेव प्रवर्तत इति लोकसिद्धन्यायादेवेत्यहं जाने । न तु मदीयां शक्तिमवलोकयन् भवान् मयि दयां करोति । अहं तु भवदीयकृपापात्रं, भवांस्तु जगदीश्वरवत् स्वाश्रितेषु दयालुरिति ॥

पर्यायोक्तं —

"पर्यायोक्तं तु गम्यस्य वचो भङ्ग्यन्तराश्रयम्"

यत्र यद्गम्यत्वेन विवक्षितं तस्यैव विवक्षितादपि चारुतरेण केनचिद्रूपान्तरेण भङ्ग्यन्तरेणाभिधानं तत्र पर्यायोक्तम् ।

यथा वा -

काठिन्यं कुचयोस्सुधाधरतटे वैपुल्यमक्ष्णोर्गतौ
गाम्भीर्यं वदनेऽब्जगन्धमुकुरं प्रत्यर्थिते केकिना ।

CC-0. SaTasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वैरं येन कचे सुधैव रचितान्येतान्यमित्रावनी-
नाथानां महिलाजनस्य जयति श्रीचोलभूमीश्वरः ॥ -७८

अत्र श्रीचोलभूमीश्वरः साधारणरूपो गम्यः । स एवामित्रावनीनाथमहिलाजनस्य कुचादिनिष्ठकाठिन्यादिवैयर्थ्यकारित्वरूपरूपान्तरेणाप्यभिहित इति । ईदृशं रूपान्तरं चारुताहेतुः । विपक्षक्षितिपतिमहिलाजनकुचादिनिष्ठकाठिन्यादिवैफल्यकारित्वरूपस्यास्य शत्रुनिरासकत्वद्योतकत्वात् । अन्यथा कुचादिकाठिन्यादीनां वैफल्यकथनानुपपत्तेः ॥

" पर्यायोक्तं तदप्याहुर्यद्व्याजेनेष्टसाधनम् "

तदपि पर्यायोक्तमाहुः ।

यथा वा ।

सुरधुनि ! विबुधेन्द्रास्सन्ति देशे मदीये
तटमपि तव हित्वा तत्र दानानि कुर्वे ।
मयि कुरु करुणां तामित्थमाभाष्य सम्राट्-
छरभ भुवननाथः प्राप्तवान्चोलदेशम् ॥ -७९

हे सुरधुनि ! दानानन्त्यफलदं तव तटमपि, मद्देशं गच्छामि, मयि त्वं करुणां कुरु । तत्रैव महादानानि कुर्वे । यतो मदाश्रया विबुधेन्द्राः तत्र सन्ति । अत इत्युक्त्या सोऽयमस्य स्वाश्रितविबुधपरिपालनरूपस्य गङ्गातीरपरित्यागेन स्वदेशे महादानकरणव्याजेनानेन साधितमित्यन्यव्याजेन इष्टसाधनमत्र प्रतीयत इति ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

व्याजस्तुतिः –

"व्यक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुतिनिन्दयोः"

यत्र निन्दास्तुतिभ्यां स्तुतिनिन्दयोः व्यक्तिः तत्र व्याजस्तुतिः । निन्दया स्तुतेः अवगमनं स्तुत्या निन्दाया इति ।

यथा वा —

वाहारूढेऽभियोद्धुं त्वयि शरभमहीनायके स्यन्दनस्था-
स्सर्वे प्रत्यर्थिभूपा मिहिरकृतमहामार्गतो दिव्यदेशम् ।
प्राप्तास्तत्रैव देवैः कृतवसतिमहाभूतयस्सन्ति तेषां
राजन्नाचन्द्रमीशस्त्वसि क्षितिभजां नैव कर्तुं प्रतीपम् ॥

अत्र वर्णनीयस्य राज्ञः तेषां प्रतीपं कर्तुं त्वमशक्त इत्युक्त्या सामर्थ्यप्रतिपादनरूपनिन्दाव्याजेन त्वयि योद्धुं प्रवृत्तेः त्वदीयशत्रवः युद्धे पराजिताः सूर्यमण्डलं भित्वा स्वर्गं गताः । तत्र तिष्ठन्ति न तु त्वया सह योद्धुं समर्था इति स्तुतेर्व्यक्तेरिति –

समागतममित्रहं शरभरत्नगर्भेशितः
विपक्षधरणीधराः प्रतिसमीक्ष्य तुभ्यं ददुः ।
यतो भवनमालिनीममितरत्नपूगावृतां
पुरीं न च वसन्त्यहो भुवनमण्डले तत्समाः ॥ -८१

अत्र हे शरभरत्नगर्भेशितः ! योद्धुं समागतं त्वां प्रतिसमीक्ष्य विरुद्धभूपतयः यतः तुभ्यं भवनमालिनीं रत्नावतीं पुरीं ददुः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अतः तेषां समा भुवनमण्डले न सन्तीति स्तुत्या त्वया साकं योद्धुमशक्तास्ते बहुरत्नावृतां भवनमालिनीं स्वपुरीं तुभ्यं दत्वा तां परित्यज्य नगराद्भ्रष्टाः वनं ययुः । अतस्तेषां समाः केप्यधमा भूमण्डले न सन्तीति तदीयनिन्दाया अभिव्यक्तेरितिस्तुत्या निन्दाभिव्यक्तिरूपो व्याजस्तुत्यलङ्कारः ॥

क्वचिदन्यस्तुत्याऽन्यनिन्दायाः अन्यनिन्दया अन्यस्तुतेः अभिव्यक्तिः दृश्यते तत्रापि व्याजस्तुत्यलङ्कारः । अन्यस्तुत्या अन्यनिन्दायाः अभिव्यक्तिर्यथा —

हृतविमतमहीभृद्राष्ट्रकोशाश्वनागः
शरभभुवननाथश्चोलसिंहासनस्थः ।
जयति जन चकोरानन्दसन्दोहनेन्दुः
त्रिभुवनमधिशेते यस्य चोद्दामकीर्तिः ॥ -८२

अत्र अन्यस्य श्रीशरभोजिमहाराजस्य उक्तप्रकारेण स्तुत्याऽहितकारिणां राज्ञामेते पराहृतस्वराष्ट्रादयो दुर्बलाः । तरलमिति निन्दाया अभिव्यक्तेरिति । अन्यनिन्दयाऽन्यस्तुतेरभिव्यक्तिः यथा —

सर्वं समर्प्य वसुधां नगरीं च कोशं
अश्वान्रथानपि गजान्परसैनिकाय ।
चोलाधिपाय विपिने वसतां नृपाणां
साफल्यमीषदपि नास्ति जनैः क्षमायाम् ॥ -८३

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अत्र स्वीयं वसुत्रादिकं सर्वं श्रीचोलनाथाय समर्प्य वने निवसतां राज्ञां न जन्मनः फलमित्यन्यनिन्दया शत्रूनां सर्वमप्यपहृत्य स्वनगरे सुखेन निवसतः श्रीशरभेन्द्रमहाराजस्य जन्म सार्थकमित्यन्यनिन्दयाऽन्यस्तुतिरभिव्यज्यते ॥

क्वचिदन्यस्तुत्याऽऽत्मनिन्दायाः अन्यनिन्दयाऽऽत्मनस्तुतेरभिव्यक्तिर्दृश्यते तत्रापि व्याजस्तुतिः ।

अन्यस्तुत्या आत्मनिन्दायाः अभिव्यक्तिर्यथा —

कस्त्वं भोः शरभेन्द्रभूपतिसभाविद्वान्किमेतत्करे
भूषां तुभ्यमदात्क एष नृपतिश्श्रीमानसौ किं महान् ।
तेषां चेत्सफलं तवैव सकलं यस्मात्छृणोष्यादरा-
द्वाक्यं तस्य मुखारविन्दगलितं वक्त्रं तथा द्रक्ष्यसे ॥ -८४

अत्र प्रश्नोत्तरभावेन यस्मात्त्वं श्रीशरभेन्द्रमहाराजस्य सभायां स्थितः सम्मानितश्च तेन तं च सदा पश्यसि, तन्मुखारविन्दगलितं वाक्यं शृणोषि च । अतस्तव जन्मादिकं सकलं सफलमित्यन्यस्तुत्या, ईदृशीं सभामप्राप्तस्य विदुष आत्मनः निन्दया अभिव्यक्तिरिति अन्यनिन्दया आत्मस्तुतेरभिव्यक्तिर्यथा —

सभामनासाद्य वरासनेशितुः
श्रीचोलभूपालमणेर्बुधोत्तमाः ।
तिष्ठन्ति तेषामखिलागमोत्थिता-
विद्यास्समस्ता विफला भवन्त्यहो ॥ -८५

CC-0. Saraswati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अत्र श्रीचोलभूपालसभामनासाद्य स्थितानां बुधानां समस्ता अपि विद्या विफलाभवन्तीत्यन्यनिन्दया, ईदृशीं सभामाश्रित्य स्थितस्य विदुष आत्मनः सफलविद्यावत्वरूपस्तुतेरभिव्यक्तेरिति । यद्यप्यत्र अप्रस्तुत-निन्दनादिना प्रस्तुतस्तुत्यादेरभिव्यक्तेः अप्रस्तुतप्रशंसेति वक्तुं शक्यते, तथाप्यप्रस्तुतनिन्दादिना यत्रप्रस्तुतस्तुत्यादेरेवाभिव्यक्तिस्तत्र व्याजस्तुतिः । अन्यत्राप्रस्तुतप्रशंसेति विवेकोपपत्तेः ।

व्याजनिन्दा: —

" निन्दाया निन्दया व्यक्ते व्याजनिन्देति गीयते "

यत्र निन्दया निन्दाया अभिव्यक्तिः तत्र व्याजनिन्दालङ्कारः ।

यथा वा —

भवादृशानां शरभेन्द्रभूपतेः
उपेयुषां नैव सभां बुधोत्तमाः ।
विद्यां निरर्थामदिशत्किलाब्जजः
स एव भूयः क्षितिदेवनिन्दितः ॥ -८६

अत्र शरभेन्द्रभूपतेः सभां प्रत्यनागतेभ्यो बुधेभ्यो निरर्थकां विद्यामदिशत् किलाब्जजः स एव सर्वनिन्दितां मरुभूदातृवत् इत्यन्य-निन्दया तदन्येषां श्रीशरभेन्द्रमहाराजसभां प्रत्यनागतानां विफल-विद्यावन्त एत इति निन्दाया अभिव्यक्तेरिति ॥

आक्षेपः —

" आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात् "

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यत्र स्वयमुक्तस्य विचारणात्प्रतिषेध प्रतीयते तत्राक्षेपालङ्कारः ।

यथा वा –

स्वर्गे कल्पमहीरुहप्रभृतयः सन्तीष्टसन्दोहदाः
कं वार्थं ननु साधयासि भुवने नैवाद्य राधासुतः ।
भ्रान्त्येथं गदितं मया ह शरभक्ष्मापालचूडामणौ
दातर्यमरभूरुहोऽपि पुरतस्सिंहासने तिष्ठति ॥ -८७

अत्र कल्पवृक्षप्रभृतयः स्वर्गे सन्ति, कर्णस्त्विदानीं भूमौ नास्ति । अहं चार्थी कस्माकं वार्थं साधयामिति स्वोक्तस्यैव पुरत एव सिंहासने सर्वार्थदायकस्य कल्पवृक्षस्यापि दातरि श्रीशरभेन्द्रक्ष्मापाल-चूडामणौ सति यदुक्तमित्थं मया तद्भ्रान्त्यैवोक्तमिति विचारणात्प्रतिषेधः प्रतीयत इति ॥

"निषेधाभासमाक्षेपं बुधाः केचन मन्वते"

केचिदलङ्कारसर्वस्वाकारादयः स्वोक्तविचारणात्प्रतिषेधमात्रं नाक्षेपः किन्तु यत्र स्वोक्तो निषेधो बाधितस्सन्नर्थान्तरपर्यवसितं किञ्चिद्विशेष-माक्षिपति तत्राप्याक्षेप इति ।

यथा वा –

त्रिपक्षगानां तव चोलभूपतेः
वयं न दासाश्शपथैस्सहस्रशः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वक्ष्याम इत्थं न च कश्चिदीक्ष्यते
शत्रुस्त्रिलोक्यां जयिनो नृपेष्वहो ॥ -८८

अत्र 'चोलभूपते वयं विपक्षगानां नृपाणां दासानेति सहस्रशः शपथैः वक्ष्याम' इति तैरेवोक्तो न वयं तेषां दासा इति । निषेधो बाधितस्सन् सन्धिकालोचितकैतववचनपरिहारेण तेषां यथार्थवादित्वे पर्यवस्यन् त्रिलोक्यां नृपेषु जयिनस्तव कश्चिच्छत्रुरेव नास्ति । यद्यस्ति, तर्हि स विनश्यत्यतः सर्वेऽपि भूपालास्त्वया भृत्यवत्संरक्षणीया इति विशेषमाक्षिपति इति ॥

"आक्षेपोऽन्यविधौ व्यक्ते निषेधे च तिरोहिते"

यत्र, अन्यार्थस्य विधेर्व्यक्तिः कस्यचित् अर्थनिषेधस्य तिरोधानं च प्रतीयते तत्रापि आक्षेपः ।

यथा वा —

नाथं प्राह सती विरुद्धवसुधाधीशस्य वैरं कुरु
त्वं भोः श्रीशरभेन्द्रभूपतिकुलाधीशेन किं वा मया ।
चीर्णं दुष्कृतमित्थमिष्टनिचयान्स्वर्गस्थितानादरात्
सुत्रामाणमवाप्य मित्रवसुधापात्रा समं भोक्ष्यसे ॥ -८९

विपक्षभूपालं प्रति तद्भार्योक्तं वचनम् । हे नाथ, त्व सुत्रामाणमवाप्य मित्रवसुधापात्रा समं आदरात् स्वर्गस्थितानिष्टनिचयान् भोक्ष्यसे । अतः श्रीशरभेन्द्रमहाराजेन त्वं वैरं कुरु, मया किं वा दुष्कृतं कृतमिति । अत्रान्यस्य स्वर्गस्थभोगस्य विधिः, यतस्त्वं ईदृशो भवस्यतः तेन विरोधं मा कुर्विति निषेधस्त्वभिमतः ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

एवं च भोक्षम इत्यनेनान्यविवेःव्यक्तिः वैरं तेन कुर्वित्यनेन वैर-निषेधस्य च तिरोधानं च प्रतीयत इति ॥

"आभासत्वे विरोधस्य विरोधाभास इष्यते"

यत्र श्रुतपदार्थयोः प्रथमतः विरोधः प्रतीयते; ततस्तदर्थयोः पदयोः एकस्य अन्यार्थपरत्वपरिकल्पने न विरोधस्याभासत्वं च तत्र विरोधाभासालङ्कारः ।

यथा वा —

असङ्ख्यगुणपूर्णोऽपि सङ्ख्यावद्गुणवानसौ ।
यतो नास्त्यस्य सदृशः कश्चिच्चोलमहीपतेः ॥ -९०

अत्र, असङ्ख्यगुणपूर्णत्व, सङ्ख्यावद्गुणवत्वयोः विरोधः, सङ्ख्यावच्छब्दस्य "सङ्ख्यावान्पण्डितः कविः" इत्यभिधानेन कविविद्वत्परत्वात् तद्गुणः कवितादिभिरयं पूर्ण इत्यर्थकरणेनाभासीकृत इति ॥

विभावना: —

"विभावना विनापिस्यात्कारणं कार्यजन्म चेत्"

यत्र कारणं विनापि कार्यमुत्पद्यते तत्र विभावनालङ्कारः ।

यथा वा —

ज्ञात्वा हृद्गतभावमाशु कृतिनामज्ञापितं तैः पुरा
तेभ्यश्शरभेन्द्रभूपतिमणिः भूरत्नभूषादिकान् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दत्वा तान्परितोषयत्यतितरां तुल्यो भवेत्किं विभोः
दातुं नार्थितवस्तुनोऽप्यकुशलः कश्चिन्नृपः क्ष्मातले ॥

अत्र ये स्वाशयमन्यस्मै विज्ञापयन्ति तेषां तादृगमाशयमन्यो जानातीत्यन्याशयज्ञानं प्रत्यन्यविज्ञापनं हेतुरिति लभ्यते । प्रकृते च बुधैः स्वाशये प्रकटितेऽप्यमी तेषामाशयं जानातीति स्वाशयप्रकटनलक्षणकारणाभावेऽपि तत्कार्यस्य तद्ज्ञानस्य अन्यस्मिन्नुत्पत्तिः दृश्यते । न च विरोधः सर्वज्ञत्वात्स्वत एव सर्वं जानातीत्युक्तौ बाधकाभावादिति ॥

"हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सा मता"

हेतूनां यत्स्वधर्मविशिष्टत्वं तत्समग्रत्वम । तदभावोऽसमग्रत्वम । ये समग्रास्त एव कार्यं साधयन्ति, नान्य इति लोकप्रसिद्धो न्यायः । यत्र च ईदृशन्यायातिक्रमेण असमग्रेभ्यो हेतुभ्यः कार्योत्पत्तिः दृश्यते तत्राऽपि सा विभावना मता ।

यथा वा -

हेतिश्शीशरभेन्द्रभूपतिमणे राज्ञाममित्रात्मना-
मप्राप्यांगमजस्रमश्रु निचयं नेत्राणि दोग्ध्याशु भोः ।
भूतिर्याऽष्टविधा त्वदीयभवनप्रान्तस्थिता धीमतां
हृत्कल्हारततिं विकासयति सा ज्योत्स्नेव राकाविधोः ॥

अत्र, आयुधानां शत्रुशरीरसम्बन्धरूप स्वधर्माभावेऽपि तदश्रुरूपकार्यजनकत्वात् । तथाष्टमहाभूतेस्त्वद्भवनस्थितायाः धीमत्सम्बन्ध-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रूप स्वधर्माभावेऽपि तदुपजीव्यत्वमात्रेण तत्तोपकत्वात् । अतोऽसमग्रेभ्यो हेतुभ्यः कार्यजन्म दृश्यत इति ।

"कार्योत्पत्तिस्तृतीया स्यात्सत्यपि प्रतिबन्धके"

यत्र प्रतिबन्धके सत्यपि कार्योत्पत्तिर्दृश्यते तत्रापि तृतीया विभावना ।

यथा वा –

प्रतपति मिहिरे प्रतापनाम्नि
प्रवरगुणाश्रयविद्रुता विपक्षम् ।
भटविधृतसितातपत्रिणस्ते
शरभमहीन्द्र विपक्षभूमिपालाः ॥ -३२

लोकेऽच्छत्रिणः तपने प्रतपति तत्सहनाशक्ताः पलायनं कुर्वन्ति, न तु छत्रिणः । तत्र प्रतिबन्धक छत्रवत्वात् । प्रकृते तु न तथा । यतः तत्र प्रतापतपने प्रतपति स्वच्छत्रवः भटविधृतसितातपत्रिणोऽपि त्वत्प्रतापतपनतापासहिष्णवो विद्रुता भवन्ति । अतः एवं च आतपत्ररूपप्रतिबन्धके सत्यपि तापरूपकार्योत्पत्तिरत्र दृश्यत इति ।

"अकारणात्कार्यजन्म चतुर्थी स्याद्विभावना"

यत्राकारणात् कार्यजन्म दृश्यते तत्र चतुर्थी विभावना ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा —

आगातुं शरभाख्यसिन्धुरशना नाथस्य नार्यो गुणा-
नुद्युक्ताः कुसुमायुधस्य विवरं कुर्वन्त्य इन्दुप्रभाः ।
सौन्दर्यादिगुणैस्ससर्जु रमलान्तन्त्रीनिनादान्दरा-
दाश्चर्यं विमलेषु हर्म्यभवनेष्वासीत्समन्ताद्विभोः ॥

अत्रागातुमुद्युक्ता नार्यः स्वकण्ठाख्यदरात् तन्त्रीनिनादान्ससर्जुः इत्युक्त्या तन्त्रीनिनादाकारणाच्छंखात् तन्त्रीनिनादरूपं कार्यमुत्पद्यत इति ॥

"विरुद्धात्कार्यसम्पत्तिर्दृष्टा काचिद्विभावना"

स्वकारणविरुद्धं यत् तस्मात् कार्यरूपं समुत्पद्यत इति यत्रोच्यते तत्रापरा विभावना ।

यथा वा —

प्रतापभानौ प्रतपत्यजस्रं
सुखारविन्दानि विलासिनीनाम् ।
विरोधिनां ते शरभक्षितीन्द्र
शुष्काणि कोका अपि कम्पमानाः ॥ -९५

अत्र, अरविन्दशोषणे कोककम्पने च कारणं चन्द्रः । तद्विरुद्धः सूर्यः । तत्प्रतापाभिन्नादस्मात् शत्रुजनविलासिनीमुखारविन्द-शोषणरूपकार्यस्य तथा तासां स्तनरूपकोककम्पनरूपकार्यस्य च सम्पत्तिः दृश्यत इति ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

"कार्यात्कारणजन्मापि काचिद्दृष्टा विभावना"

लोके ययोः कार्यकारणभावोऽभिमतः तयोरन्यात्मतां प्राप्तात्कार्या-त्कारस्य च यत्र जन्म दृश्यते तत्रापरा विभावना ।

यथा वा —

जातं तोयात्सरोजं न च जलमभवत्पङ्कजाज्जातु चित्रं
दातुःश्रीपाणिपद्माच्छरभनरपतेर्गाङ्गधाराभिरद्य ।
जातं जातं जलजानां दिशि दिशि बहुशो वार्धिकासाररूपं
तिष्ठत्यावाररूपं बहिरपि भवनादाण्डकोशाद्विधातुः ॥

अत्र, जलपद्मयोः कारणकार्यभावे निश्चितेऽपि गाङ्गोदक-धाराभिः महादानकर्तुः श्रीशरभेन्द्रमहाराजस्य पाणिपद्माज्जातं जलजातं सर्वत्र समुद्रादिरूपं तिष्ठतीत्युक्त्या कार्यकारणजन्मप्रतीयत इति ।

॥ इति श्री गुणरत्नाकरे विभावनाप्रकरणम् ॥

## ॥ असम्भवः ॥

"असम्भवोऽर्थनिष्पत्तेरसम्भाव्यत्व वर्णनम्"

यत्र, अर्थोत्पत्तेः असंभाव्यत्वं वर्ण्यते तत्र असंभवालङ्कारः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा –

दाता को वा बुधानां श्रुतिविहितमहादानकृच्चोलसम्राट्
कुत्रास्ते तञ्जापुर्यामिति श्रुतिसुखदं वाक्यमाकर्ण्य कश्चित् ।
विद्वान्स्वप्रेमपात्रं वचनमिदमुवाचेदृशोऽस्तीति को वा
वेदास्मिन्दुष्टकाले त्वरितमहमितो यामि भूपालरत्नम् ॥

अत्र, अस्मिन्दुष्टकाले एतादृशो महादानकर्तास्तीति को वा वेदेत्यनेन अस्मिन्कलिकाले कृपणे धर्मसक्तेषु नृपेष्वीदृशो महात्मा तिष्ठति वा, स तु महादानानि करोति वेति महादानकरणरूप-कार्यस्यासम्भाव्यत्वं प्रतीयत इति ।

असङ्गति –

"विरुद्धं भिन्नदेशित्वं कार्यहेत्वोरसङ्गतिः"

यत्र ययोः कार्यहेत्वोः भिन्नदेशित्वं विरुद्धं, तयोः कार्य-कारणभावे वर्ण्यमाने सति असङ्गत्यलङ्कारः ।

यथा वा ।

विपक्षभूपालकुलं समाश्रिते
खड्गे त्वदीये शरभेन्द्रभूपते ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

विपक्षिणामम्बुजसुन्दरानना

इयमुञ्चदश्रूणि दृगम्बुजन्मभिः* ॥ -९८

लोके समानाधिकरणयोः अश्रुपतन खड्गक्षतयोः कार्यकारणभावो दृष्टः । न तु भिन्नाधिकरणयोः, अतिप्रसङ्गात् । यद्यप्यनयोः भिन्नदेशत्वं विरुद्धं तथाप्यत्र भिन्नदेशयोरपि कार्यकारणभावोदृश्यते । त्वदीयशत्रुनिष्ठस्य त्वद्खड्गक्षतस्य तदीयाङ्गना संबन्ध्यश्रुजनकत्व-दर्शनादिति ॥

"अन्यत्र करणीयस्य ततोऽन्यत्र कृतिश्च सा"

यत्रैकत्र करणीयत्वेन संमतार्थस्य ततोऽन्यत्र तदन्यस्मिन् या कृतिः करणं तत्रापि साऽसङ्गतिः ।

यथा वा –

कुर्वन्ति ते किसलयं निजकर्णभूषां

वक्त्रस्य भूषणमजस्रमसित्रशत्रो ।

चोलेश ये विमतवर्त्मनिविष्टचित्ताः

ते खड्गमिन्धनतृणादिषु पातयन्ति ॥ -९९

अत्र, अन्यत्र स्वकर्णादौ भूषात्वेन करणीयस्य किसलयस्य तदन्यस्मिन्नुक्ते यद्भूषणत्वेन करणं, तथा शत्रौ करणीयस्य खड्गादि-

* मुमोचुरिति 'ख' मातृकायाम् । "इयश्रूण्यमुञ्चत्नयनाम्बुजन्मभिः" इति स्यात् ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

रूपायुधव्यापारस्य तदन्यस्मिन्तृणादौ करणं, तदप्यन्यत्र करणीयस्यान्यत्र कृतिरिति ॥

"अन्यत्कर्तुं प्रवृत्तस्य तद्विरुद्धकृतिस्तु सा।"

यत्र यो यत्कार्यं कर्तुमुद्युक्तः तस्य तादृशकार्यविरुद्धं यत्तस्य कारणं प्रतीयते यत्राप्यसङ्गतिः ।

सम्प्राप्य नाथपदवीमवनीश्वराणां
चोलेश्वरस्य परमासनमास्थितोऽस्मि ।
तेन त्वदीयपदपङ्कजलग्नमूर्धा-
कूटस्थितोऽपि भवता परिरक्षणीयः ॥ -१००

अत्र श्रीशरभेन्द्रमहाराजपदयोः मूर्ध्ना नमन्तं प्रत्यर्थिभूपालं दृष्ट्वाऽमात्यो ब्रूते । हे स्वामिन्, अवनीश्वराणां नाथपदवीं संप्राप्य राजाधिराजोभूत्वा श्रीचोलसिंहासनं प्राप्तोऽस्मि । यतोऽयं त्वया संरक्षणीयः, न तु त्याज्यः । यद्येन त्यजसि तदा राजाधिराजपदं प्राप्तस्य तव राजसंरक्षणरूपकार्यविरुद्धकार्यकरणं स्यात् । अतोऽप्ययं संरक्षणीयः इत्यन्यत्कर्तुं प्रवृत्तस्यान्या कृतिः सम्पन्नेति इति ॥

विषमः -

"विषमं वर्ण्यते यत्र घटनाननुरूपयोः"

यत्राननुरूपयोर्वस्तुनोः घटना वर्ण्यते तत्र विषमालङ्कारः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा —

हे कर्णाट महीश चोलविषयाधीशस्य साम्यं यदा
प्राप्तुं वाञ्छसि देहि रक्ष विबुधांस्तेभ्यो धनान्यादरात् ।
नोचेत्त्वं क्व च चोलराट् क्व च महादानस्य कर्ता विभुः
श्रीमाञ्छ्री शरभेन्द्रभूपतिमणिर्यः कल्पवृक्षं ददौ ॥

अत्रोक्तगुणैः अननुरूपयोः कर्णाटकचोलाधिपयोः साम्यघटन प्रतीयत इति ।

"विरूपकार्यस्योत्पत्तिरपरं विषमं मतम्"

लोके तन्त्वादिरूपकारणात्स्वसमानरूपं पटादिकमुत्पद्यते, न भिन्नरूपम् । यत्र तु कारणात्स्वविरूपं कार्यमुत्पद्यते तत्राऽपरं विषमम् ।

यथा वा —

दत्तानि हाटकमयानि विभूषणानी
पीतानि यानि विबुधेषु दयाकरेण ।
तेभ्यो बभूवुरमलानि यशांसि तस्य
शुभ्राणि चोलविषयाधिपतेर्महान्ति ॥ -१०२

अत्र पीतरूपेभ्यो विभूषणेभ्यः तद्विरूपाणां शुभ्रयशसामुत्पत्ति- र्दृश्यत इति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

"अनिष्टस्याप्यवाप्तिश्च तदिष्टार्थसमुद्यमात्"

यत्र स्वेष्टार्थसम्पादनोद्योगादिष्टस्य हानिः अनिष्टस्याप्यवाप्तिश्च दृश्यते तत्राऽपि तद्विषमम् । इष्टो द्विविधः । अर्थरूपः अनिष्टनिवृत्तरूपश्चेति । तत्रार्थरूपेष्टार्थसमुद्यमात्तदनवाप्तिः अनिष्टावाप्तिश्च यथा –

साम्यं त्वद्भव्याप्तकीर्तेर्जगति विधुरयं चन्द्रिकाया विधातुं
तामालिङ्ग्याखिलाङ्गामटति पटुगतिस्तत्र यं देशमाप ।
मेरोस्तत्रैव साभूद्विततिमधिगता नैव तस्मात्कलङ्की
भूत्वा भ्राम्यत्यजस्रं शरभनरपते मज्जति
प्राब्धिमध्ये ॥ -१०३

अत्र विधोः स्वचन्द्रिकायाः श्रीशरभेन्द्रमहाराजकीर्तिसाम्यरूपस्वेष्टार्थ समुद्यमात् तदनवाप्तिः, तस्मात्कलङ्कित्वाद्यनिष्टावाप्तिश्च दृश्यत इति ।

स्वस्यानिष्टपरिहाररूपेष्टार्थसमुद्यमात् स्वानिष्टस्यापरिहारः प्रत्युतानिष्टवाप्तिश्च यथा –

श्रीमच्चोलमहीशदानजनितात्युद्दामभीत्या बुधान्
दारिद्र्यं तु विहाय भूपनिकुलं प्रेमास्पदं
नास्य तत् ।
प्राप्तं तत्र तदीयखड्गपतनाद्भ्रष्टाश्रयं सत्त्वरं वा
तिष्ठत्यद्य महीमहीन विधृतावस्मिन्हि संशासति ॥-१०४

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अत्र विबुधनिष्टस्य दारिद्र्यस्य श्रीशरभेन्द्रमहाराजमहादानजनित-भीतिरूपानिष्टपरिहारार्थं विबुधान्विहाय विपक्षक्षितिपान्प्रविष्टस्य तत्राऽपि तदीयखड्गपतनरूपनिमित्तेन भ्रष्टाश्रयस्य धर्मरूपस्य क्वाप्यवस्थानमेव नास्तीत्युक्त्या तादृशभीतिरूपानिष्ट परिहाररूपेष्टार्थप्राप्त्युद्यमात् तत्प्राप्तिः भ्रष्टाश्रयत्वरूपानिष्टप्राप्तिश्च दृश्यत इति ॥

परानिष्टप्रापणरूपस्वेष्टार्थसमुद्यमात् परस्य अनिष्टानावाप्तिः प्रत्युत स्वस्यानिष्टप्राप्तिश्च यत्र दृश्यते तत्राऽपि विषमालङ्कारः ।

यदा वा —

भवेद्विबुधमण्डलं क्षितितटस्थमापीडितं
ह्यकिञ्चनतयाब्धिजाममरनायके गां दिवि ।
निवेशितवति क्षितौ विबुधसङ्घमापोच्चकै-
र्धनानि शरभेशितुर्वितरणात्कृशत्वं च सा ॥ -१०५

अत्रेन्द्रः स्वर्गस्थेषु विबुधेष्वभिमानात् रसातलस्थाविबुधास्सर्वेऽपि निष्किञ्चना भवेयुः, यदि कामधेनुर्भूतले तिष्ठति तदा ते तथा न भवन्ति इति मत्वा(?)यविबुधाः सम्प्राप्ताखिलकामाश्च न भवन्ति । अतः कामधेनुं स्वर्गे निवेशयामीतिबुद्ध्या तां स्वर्गेऽमरनायके निवेशितवति क्षितिमण्डलस्थाः सर्वेऽपि विबुधाः श्रीशरभेन्द्रमहाराजात् धनान्युच्चकैः प्रापुः । प्रत्युत तदीयवितरणात्साऽपि कामधेनुः लज्जया कृशत्वमाप । ततः स्वर्गस्थेभ्यो कामदोग्ध्री न बभूवे-त्युक्त्या इन्द्रस्य क्षितिमण्डलस्थविबुधसम्बन्धिपरानिष्टप्राप्त्युद्यमानात् तेषां तदनवाप्तिः प्रत्युत स्वानिष्टप्राप्तिश्च दृश्यत इति ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अनिष्टस्याप्यवाप्तिश्चेति श्लोके "अपिपदात्" न केवलमिष्टार्थसमुद्यमात् अनिष्टस्यावाप्तिः किन्तु इष्टानवाप्तिश्चेति च प्रतियते। तेन स्वेष्टार्थसमुद्यमात् स्वस्यानिष्टावाप्तिः, स्वेष्टार्थसमुद्यमात् स्वस्येष्टानवाप्तिश्चेति विषमद्वयं भवति। तत्र स्वेष्टार्थसमुद्यमात् स्वस्यानिष्टप्राप्तिर्यथा —

हे दारिद्र्य कृपां विधाय विबुधेष्वत्युत्तमां तान्सभां
श्री तञ्जानगरीश्वरस्य नयसे जानासि नैवोचितम्।
ते तां प्राप्य निराश्रयत्वमधुना कुर्वन्ति ते कुत्र वा
तिष्ठन्त्यष्ट दिगन्तरेऽपि वसतिस्तानन्तरेण क्व वा॥ -१०६

अत्र चिरकालं विबुधेष्ववस्थितस्य तदियदारिद्र्यस्य तेषु कृपया तेषां धनलाभाय श्रीचोलनाथसभाप्रापणरूपस्वेष्टार्थ समुद्यमात् स्वस्य निराश्रयत्वरूपानिष्टप्राप्तिः दृश्यत इति। स्वेष्टार्थसमुद्यमात् स्वस्येष्टानवाप्तिर्यथा –

वैदुष्यं ननु वृद्धिमाप शरभक्ष्मापालचूडामणेः
सङ्ख्यावद्गतमत्समीपनिलयं तां यामि मत्वेति तान्।
आरुह्यागतमाशु तावक सभां दैन्यं दयां तेषु ते
दृष्ट्वा तानपहाय वैरिजनतां लब्ध्वा वरीवर्तते॥ -१०७

अत्र विद्वन्निष्ठदैन्यस्य वैदुष्यादिवत् श्रीशरभेन्द्रमहाराजात् स्ववृद्धिं आकाङ्क्षमाणस्य तदर्थं विद्वज्जनान् अधिरुह्य श्रीराजसभां

श्री 9

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

गतस्य तस्मात्स्वेष्टरूपा वृद्धिः न दृश्यतेति स्वेप्सार्थाद्यभावात्तदलाभः प्रतीय इति ॥

॥ इति श्रीगुणरत्नाकरे विषमालङ्कारप्रकरणम् ॥

(८)

## ॥ अथ समम् ॥

"समं स्याद्वर्णनं यत्र द्वयोरप्यनुरूपयोः"

अनुरूपयोः द्वयोः यत्र वर्णनं तत्र समालङ्कारः ।

यथा वा –

धर्मावृतां सिंहनरेन्द्रकन्यका-
संरक्षितां सस्य मयीं धरामिमाम् ।
निरीक्ष्य तस्याः शरभाख्यनायकं
गुणानुरूपं भगवान्ससर्ज ह ॥ -१०८

अत्र चोलभूशरभमहाराजयोः धर्मावृतत्वेन अनुरूपयोः साम्यं वर्ण्यत इति ॥

"सारूप्यमपि कार्यस्य कारणेन समं विदुः"

यत्र कारणेन कार्यस्य सारूप्य स्फुरति तत्र समालङ्कारः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

श्रीमान् श्रीतुलजेन्द्रभूपतिमसौ धर्मैर्जिगायेति
यद्युक्तं श्रीशरभेन्द्रभूपतिमणेः सोप्यात्मतातं पुरा ।
जित्वा तैर्वसुधां ररक्ष महिताः पूर्वोद्भवेभ्यः परे
राजानश्चरितैः गुणैश्च कुलजाश्श्रीपद्मबन्धोस्ततः ॥

अत्र कार्यभूत श्रीशरभमहाराजः स्वधर्मैः श्रीतुलजेन्द्रमहाराजं जिगायेति यत् तद्युक्तमेव । यतः सोऽपि तुलजेन्द्रमहाराजः तैरेव धर्मैः स्वतातं श्रीप्रतापसिंहमहाराजं जित्वा महीं ररक्ष । न केवलमेतावत् । एतत्कुलनायकस्य पङ्कजबन्धोः कुलेजाताः भूपतयः पूर्वोत्पन्नेभ्यः पाश्चात्याश्चरितैः गुणैश्च यतोऽधिकाः अत इत्युक्त्या कारणभूतेभ्यः पूर्वोत्पन्नेभ्यः कार्यभूतानां उत्तरोत्पन्नानां धर्मैः स्वकारणभूतस्वतातजेतृत्वरूपसाधर्म्यमनुच्यत इति कार्यकारणयोः सारूप्यं दृश्यत इति ॥

"विनाऽनिष्टं च तत्सिद्धिः यदर्थः कर्तुमुद्यमः"

कर्तुः उद्यमः यत्प्रयोजनकः तस्य प्रयोजनस्य अनिष्टं विना यत्र सिद्धिर्भवतीति ज्ञायते तत्राऽपि समालङ्कारः ।

यथा वा —

स्नातुं गच्छति गाङ्गवारिणि जटाजूटाद्धरस्यागते
चोलेन्द्रोऽयनवृत्तिनः क्षितिभुजो दत्वा करं श्रीमते ।
भक्त्या नेमुरमुं ततस्सुरनदी सम्प्राप्तवान्सा करै-
रूर्म्याख्यैः परिषस्वजेऽर्भकसमं ज्ञात्वा पराक्रान्तिषु ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अत्र गङ्गास्नानार्थमुद्यमकर्तुः श्रीशरभेन्द्रमहाराजस्य गङ्गास्नानरूपं यत्प्रयोजनं तन्मार्गेऽनिष्टं विना सिद्धम् । यतस्तत्रत्या राजानः प्रतीपमकृत्वाऽस्मै करं ददुरत इति ॥

विचित्रालङ्कारः —

"विचित्रं तत्प्रयत्नश्चेद्विपरीतफलेच्छया"

यत्र यद्विपरीतफलेच्छया यत्प्रयत्नः तत्र विचित्रालङ्कारः ।

यथा वा —

हंसं द्वेष्ट्यधिकं यतः कुवलयानन्दं विधत्ते यशः
प्राप्तुं हंससमत्वमत्र शरभक्ष्मापालचूडामणेः ।
मित्रायेर्ष्यति शत्रुलोकमहिलावक्त्राम्बुजं शोषय-
त्योजस्त्वाशयभूभृतां हि नितरां मित्रत्वमाप्तुं
तथा ॥ -१११

अत्र श्रीशरभक्ष्मापालचूडामणेः यशः श्वेतिम्नाहंससमत्वमाप्तुं हंसं द्वेष्टि । [हंसः सूर्यः] कुतः ? तद्द्वेषिणः कुवलयानन्दं विधत्ते । [कुवलयमुत्पलं, कुवलयस्य भूमण्डलस्य] तथाऽसमीचीनाशयवतां सुहृदां मित्रत्वमाप्तुं ओजः प्रतापः मित्राय सूर्यायेर्ष्यति । कुतः ? यतस्तन्मित्रं शत्रुविलासिनीमुखपङ्कजं शोषयत्यत इति । श्लेषेण विरीतफलेच्छया विपरीतप्रयत्नः दृश्यत इति ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अधिकम् —

"अधिकं पृथुलाधाराद्दाधेयाधिक्य वर्णनम्"

यत्राधेयस्य पृथुलाधारात् आधिक्यं वर्ण्यते तत्राधिकालङ्कारः ।

यथा वा –

मान्धातृप्रमुखाश्च ये क्षितिभुजः शर्वादयो ये सुराः
तेषां कीर्तिपराक्रमैः सुवितनं व्याप्याण्डकोशं ततः ।
भित्वा तं बहिरप्यपूर्णवसतिं संवीक्ष्य तस्यात्मनो
गङ्गातोयमिषेण तं प्रविशति श्रीचोलसम्राड्यशः ॥

अत्र पृथुलाधाराद्ब्रह्माण्डत् तदाधेयस्य यशसः तद्बहिरन्तश्चापूर्णवसतिस्वरूप आधिक्यं वर्ण्यत इति ॥

"पृथ्व्याधेयाद्यदाधिक्यवर्णनं तदपि तन्मतम्"

यत्र पृथुभूतादाधेयात् तदाधारस्य यदाधिक्य वर्णनं तदपि तन्मतं अधिकं मतम् । तथा च यत्र पृथुभूतादाधेयात् तदाधारस्याधिक्यं वर्ण्यते तत्राप्यधिकालङ्कार इत्यर्थः ।

यथा वा –

स्वचित्तवरमन्दिराद्गरलनीलसत्कन्धरा-
च्छशाङ्ककृतशेखरात्करटिनाथचर्माम्बरात ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

भवेदधिककीर्तिमान्स्ववशभूतभूतेश्वरो
यतस्समगुरप्यसौ शरभरत्नगर्भाधिपः ॥ -११३

अत्र हृदब्जवरमन्दिरादिति विशेषणेनाधेयत्वेन प्रतीता पृथुत्वेन प्रसिद्धात् शम्भोः तदाधारस्य श्रीशरभेन्द्रमहाराजस्य भक्त्या स्ववशीकृतभक्तवशभूतेश्वरत्वसमदृष्टित्वाभ्यां ततोऽप्यधिककीर्तिप्राप्ति-योग्यत्वरूपाधिक्यं वर्ण्यत इति ।

अल्पम् —

"अल्पं तु सूक्ष्मादाधेयाद्यदाधारस्य सूक्ष्मता"

यत्र सूक्ष्मात् आधेयादपि तदाधारस्य अति सूक्ष्मता प्रतीयते तत्राल्पालङ्कारः ।

यथा वा —

यत्कोपरक्तनयनाम्बुजदृष्टिलेश-
पात्रं कृशं रिपुकुलं कृशतां पुनश्च ।
प्राप्नोति सोऽयमखिलावनिनायकानां
नाथः परं विजयते शरभेन्द्रनामा ॥ -११४

अत्र दृष्टिलेशपात्रमित्युक्त्या विषयतासम्बन्धेन कोपसंरक्तनयन-सम्बन्धिसूक्ष्मदृष्टिरूपस्य आधेयस्य आधारभूतं यत्पूर्वमेवकृशं रिपुकुलं तत्पुनश्च कृशतामवाप इत्यनेन सूक्ष्मात् आधेयाद् दृष्टिरूपात् आधारस्य रिपुकुलस्य अतिसूक्ष्मता प्रतीयत इति ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अन्योन्यम् -

"अन्योन्यं नाम यत्र स्यादुपकारः परस्परम्"

यत्र द्वयोर्वस्तुनोः परस्परमुपकारः प्रतीयते तत्रान्योन्यालङ्कारः ।

यथा वा -

विप्रास्सन्त्यधिकं कवेरतनयातीरेऽकरोस्त्वं यतो
नाथस्तस्य महान्ति हे शरभभूनाथेन्द्र दानान्यलम् ।
तस्मिन्धर्ममयं बभूव भवता तच्चापि नोचेद्द्विजाः
सन्त्यन्यत्र किमत्र धर्मनिरतो राजास्ति तत्वं
वद ॥ -१४५

अत्र 'श्रीशरभेन्द्रमहाराज ! कावेरीतीरे विप्राः सन्ति । पुण्यवशात्त्वं तस्य यतः पतिरसि । अतः तस्मिन्महादानान्यकरोः । भवतापि तच्च धर्ममयमभूत्' । इत्युक्त्याऽस्य महादानकरणे तादृक्तीरस्यापेक्षा, कावेरीतीरस्य धर्ममयत्वे ईदृश महाराजापेक्षा इत्यनयोः परस्परमुपकारः प्रतीयत इति ।

विशेषालङ्कारः -

"विशेषः स्यात्तमाधारं विनाप्याधेय वर्तनम्"

यत्र प्रसिद्धमाधारं विनाधेयस्य अन्यत्रावस्थितिः वर्ण्यते तत्र विशेषालङ्कारः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा –

त्यक्त्वा सुधां शक्रपराक्रमस्य,
श्रीचोलसिंहासन आस्थितस्य ।
माधुर्यमाश्रित्य वचस्समोहं,
तनोति तोषं विभुधोत्तमानाम ॥ -११५

अत्र आधेय भूतस्य माधुर्यस्य स्वाधारत्वेन प्रसिद्धसुधारस परित्यागेन अन्यत्रावस्तित्यभिधानपूर्वकं विबुधानन्दकरत्वरूपं महात्म्यं वर्ण्यत इति ॥

" किञ्चिदारभतोशक्यवस्त्वंतरकृतिश्च सः "

यत्र किञ्चित्कार्यं कर्तुमुद्युक्तस्य पुरुषस्याशक्यवस्त्वंतरकृति प्रतीयते तत्राऽपि सः विशेषालङ्कारः इत्यर्थः ॥

यथा वा —

राजन्केरलनाथ तावक सभां प्राप्तुं समुद्योगवा-
नासन्तत्क्षतस्सयेत्र शरभक्ष्मापाल चूडामणिः ।
दृष्टो यस्य सभा प्रवेशकरणे वाञ्छा ममाभूत्पुरा-
रक्षत्यद्य धनानि मह्यमदिशद्भूषां तथा हस्तयोः ॥

अत्र केरलनाथ सभा प्रवेशनरूप किञ्चित्कार्यं कर्तुं उद्युक्तस्य मम श्रीशरभेन्द्रमहाराजदर्शनरूपं यदशक्यवस्त्वंतरं तदनुकूलाकृतिः

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

संपद्यत इति ॥ न च दर्शनस्यात्राशक्यत्वं न प्रतीयत इतिवाच्यम् । वाञ्चाविषयत्वोक्त्या ऽशक्यत्व प्रतीतेः । पूर्वं अशक्यस्यापि इदानीं अदृष्टवशात् प्रतिसंभवर्तात्युक्तौ किमत्रदोषः ॥

"विशेषस्सोऽपि यद्येकं वस्त्वनेकत्र वर्ण्यते"

यत्र यद्येकं वस्त्वनेकत्र वर्ण्यते । यत्रापि विशेषालंकारः ॥

सत्यं चोलमहीश वच्मि हृदयं त्वल्लग्नमीषद्बहिः
नैवाप्नोति मदीयमत्र शृणुमेभिज्ञानमादृश्यते ।
मूर्तिस्तेहृदयङ्गमा मम पुरस्संयक् तथा पार्श्वयोः
स्वप्नेजागरिते विनेक्षणमतो न इच्छाम्य-
वस्थामहम् ॥ -११७

नायिकावचनमेतत्कवेः वा अत्रश्शारभेन्द्रमहाराजस्य हृदयङ्गमैकैव मूर्तिः सर्वत्रोपलभ्यत इति वर्णनाद्विशेषालंकारः ॥ स्याद्व्याघातोन्यथा-कारि तथाकारि क्रियेत चेत् । अन्यथाकारि यद्यत्साधनत्वेन लोक तोवगन्तवस्तु । तथा कारि क्रियेत चेत । तत्केनचिद्विरुद्धसाधनं क्रियेतचेत् स व्याघातः ॥

यथा वा --- अन्यथाकारिद्वियद्वरक्तयत्साधनतया केनचिदुपात्तम् । तथाकारिक्रियेतचेत् । यदन्येन तद्विरुद्ध साधनतया क्रियेतचेत् तत्राऽपि व्याघातालंकारः ।

CC-0 Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

आद्योयथा –

येनेष्टमापुः परमार्थ वेदिनः -
सामान्यलोकापि चोळभूभृता ।
अनिष्टमेते विमतावनीश्वरा-
समाप्नुवन्त्यत्र मनोहि कारिणम ॥ -११८

अत्र मनोहिकारणमित्युक्त्या सर्वेष्टसाधनत्वेन अवगत श्रीशरभेन्द्र-महाराजशत्रुभिः स्वहृदयैरेव स्वानिष्टसाधनत्वेन अन्यथाकृत इत्यन्यथा कारिणांऽपि अन्यथाकरणं संपद्यतेति ॥

द्वितीयो यथा –

दग्धःश्रृङ्गारयोनि त्रिपुरविजयिनो नेत्र कोणादि हेतिः
श्रुत्वा सखयस्सुवार्तां चकरमतिमतो नास्तिपीडा ममेति ।
दृष्ट्वा तं नेत्र कोणाः शरभनरपतिः प्रेषयत्यद्य मां वै
तस्माच्चित्तोद्भवान्मे भवति ननु व्यथा
लोकयन्त्याक्षितीशम ॥ -११९

अत्र मन्मथध्वंस साधनत्वेन हरेणापातोयो नेत्रकोणस्सएव तदन्येन राज्ञा तदुत्पत्तिसाधनत्वेनोपात इति । गुम्भःकरणमालास्या-द्यथा प्राक् प्राप्तकारणैः । यथा शब्दोनातिक्रामार्थे प्राक्प्राप्त कारणान्यनतिक्रम्यतैः । कृतो यो गुम्भः सः कारणमालास्यात् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

तथा च उत्तरोत्तरकारणभूतपूर्वपूर्वैः पूर्वपूर्वं कारणभूतोत्तरोत्तरैः वा वस्तुभिः कृतोगुंभः कारणमालेत्यर्थः ॥

अत्राद्यो यथा –

यस्यप्रतापाद्वशगा धरित्री
तस्मादवाप्तिर्नितरां धनस्य ।
तस्माद्भूद्दानमतो यशश्च
स एव राजा शरभेन्द्रनामा ॥ -१२०

अत्र पूर्वोक्तानां प्रतादीनां उत्तरोत्तरान्प्रति कारणत्वं प्रतीयत इति ॥

द्वितीया यथा –

निर्वाणं जगदीश्वरस्य कृपया सा तस्य दृष्ट्वाभवेत्
भक्त्यासाप्यमलाशयद्विमलता चित्तस्य संशोधनात् ।
तत्सत्कर्मवशादत्तोद्यशरभ क्ष्मापाल चूडामणिः
दानं यच्चमहच्चकार भगवत्प्रीत्यर्थमेवादरात् ॥

"यतच्छद्वयोरावृत्यार्थो बोध्यः"

अत्र पूर्वोक्तान् प्रत्युत्तरोक्तानां कारणत्वं प्रतीयत इति गृहीतमुक्तरीत्या अर्थश्रेणिरेकावलीमता उत्तरोत्तरस्य पूर्वं पूर्वं विशेषणाभावः गृहीतमुक्तरीतिः । पूर्वंपूर्वं उक्तस्य उत्तरोत्तर विशेषितत्वसिद्ध्यर्थं ग्रहणपूर्वकं परित्यागात् । अनयारीत्या यत्र अर्थश्रेणिः प्रतीयते तत्रैकावल्यालंकारः इत्यर्थः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा –

यो मोहाविष्टचित्तः प्रभवदितरां क्रोधवान्क्रोधवान्यः
कामीकामीभवेद्यो भवति स विषयासक्ति-
मान्सक्तिमान् यः ।
दूरेतस्येश्वरोतः शरभनरपतिः गोचरेष्विन्द्रियाणां
त्यक्त्वा सक्तिं विमोहः स्वगतपरो वर्तते दाननिष्ठः ॥

अत्र कार्यात्कारणमनुमीयते । मोहादीनां क्रोधादिकार्यत्वात् । यो मोहादिमान् सः क्रोधादिमानिति विशेष्य विशेषणाभावः । पूर्वपूर्वोक्तानां उत्तरोत्तरोक्तानां विशेष्यत्वं । एतदर्थमेव पूर्वपूर्वमुक्तस्य शब्देन ग्रहणं परित्यागश्च प्रतीयत इति ॥

मालादीपकालंकारः —

"दीपकैकावलीयोगान् मालादीपकमिष्यते"

यत्र दीपकस्यैकावल्याश्चयोगः प्रतीयते तत्र मालादीपकालङ्कारः ॥

यथा वा –

दानंकुर्वती चोळभूपतिमणौ भूपादिभिस्सूरिणां
सङ्क्षोभाति सभावतेन सभया श्रीचोळभूमण्डलम् ।
तस्मिन्तस्य यशोवरं च यशसा चन्द्रात्मना धूर्जटेः
मूर्धाचन्द्रमसा हृदम्बुजमहो तेनास्य राज्ञस्सदा ॥ -१२३

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अत्र भूषादिभिः सूरिणां संघोभाति । भातीत्यस्य सर्वत्रान्वयः तेन संघेन सभा सभायाः चोलभूमण्डलं तस्मिन् यशः चन्द्रात्मना यशसांवरं चन्द्रमसा च शंभोमूर्ध्ना शंभुना च अस्य राज्ञो हृदम्बुजमिति दीपकमेकावली च भानरूपस्यैकस्यैव धर्मस्य वर्ण्यावर्ण्य साधारण्य प्रतीतेः । पदार्थनां श्रेणि प्रतीतेश्च । अतः अत्र मालादीपकालंकारः ॥

सारालंकारः –

"उत्तरोत्तरमुत्कर्षस्सार इत्यभिधीयते"

यत्र उत्तरोक्तानां अर्थानामुच्यमानक्रमैः उत्तरोत्तरमोत्कर्षं प्रतीयते तत्र सारालंकारः ॥

यथा वा —

दातारो ननु पार्थिवास्सुभजतां तेभ्योरवेः नन्दनो
दातासोऽपि धनं पितुः न च ददौ गात्रो दिनेशे यतः
सन्तिस्वार्जितमार्जितं च जनके नादायवित्तं बहु
श्रीचोलाधिपतिर्ददाति न ततो दाताऽस्ति लोकत्रये ॥

अत्र दातृत्वेन प्रसिद्धेभ्यो पार्थिवेभ्यो रवेः नन्दनः कर्णो दाता । तथा प्रसिद्धः । तस्मादप्ययं श्रीचोलनाथो दाता यतः कर्णेनाप्यदत्त पितृधनमप्यादाय विप्रेभ्यो दत्तवानत इत्युत्कर्षं उत्तरोक्तानां प्रतीयत इति ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथासंख्यालंकारः –

"यथासंख्यं क्रमेणैव क्रमिकाणां समन्वयः"

यत्र क्रमिकाणां क्रमेणैव समन्वयः प्रतीयते तत्र यथासंख्यालंकारः ॥

यथा वा –

जहि भज परिपाहि ह्यामयारीन्सुरेन्द्रान्
विबुधकुलवरिष्टान् दुष्टमार्गाभिसक्तान् ।
इति शरभमहीन्द्रं प्रोचुरुच्चैस्सभायां
विबुधकुलवरिष्टास्स्वेष्टमालोकयन्तः ॥ -१२५

अत्र क्रमिकाणां क्रियापदानां क्रमिकेभ्यो कारकपदेभ्योन्वयो दृश्यत इति ।

पर्यायालंकारः –

"पर्यायोप्रदिपर्यायेणैकस्यानेकसंश्रयः"

यदैकस्यैव वस्तुनो पर्यायेण क्रमेणानेकः संश्रयः प्रतीयते तदा तत्र पर्यायालंकारः ॥

यथा वा ।

शौर्यं रामे कृतेभूद्भृगुवरतनये राघवे तत्परस्यां
त्रेतायां प्रादुरासीत्सुरपतितनये द्वापरे संबभूव ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अस्मिन्कालेवनीशान् प्रथितबहुबलान् भोजमुख्यान्विहाय
प्राप्तं श्रीचोलनाथं शरभनरपतिं धार्मिकानां
वरिष्ठम् ॥ -१२६

अत्रैकस्यैव वस्तुनः शौर्यस्य क्रमेणानेकवस्तुगतत्वं प्रतीयत इति । एकस्मिन् यद्यनेकं वा पर्यायः सोऽपि संमतः । यद्येकस्मिन्वस्तुनि क्रमेणानेकं वस्त्वन्वेति तत्रापि सोप्येकस्मिन्नेवावस्था भेदेन अनेकान्वयोऽपि पर्यायः ॥

यथा वा –

धनुर्हस्ते चित्ते मनसिजरिपुः यस्य समरे
बभौ पूर्वसिध्यै विजय कमलायाः क्षितिपतेः ।
करे शंभोर्मूर्तिर्हृदि तु प्रणवाख्यं धनुरभूत्
सपर्यायां तस्य प्रगुणशरभक्ष्माधिपमणेः ॥ -१२७

अत्रैकस्मिन्नेव हस्ते चित्ते च धनुः शंभोर्मूर्तिश्चावस्था भेदेन प्रतीयत इति एकस्मिन् अनेक संश्रयः प्रतीयत इति ॥

परिवृत्त्यलङ्कारः –

"परिवृत्तिर्विनिमयो .... नाभ्यधिकयोर्मिथः"

यत्र कयोश्चिद्वस्तुनोः न्यूनाधिकयोः धर्मयोः मिथो विनिमयः प्रतीयते तत्र परिवृत्त्यलंकारः ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा —

एकं वृषं फालविलोचनाय दत्वावृषोवृन्दमवाप्य तस्मात् ।
भेजे वरिष्टं शरभेन्द्रनामा वृषप्रदातेति यशस्त्रिलोक्याम् ॥

यः पात्रे ददाति सः अधिक पुण्यवान् कीर्तिमांश्च भवतीत्यत्र निदर्शनमाह । अत्र राज, शिवयोः वृषपदोदित वृषभ धर्मैः न्यूनाधिकैः मिथो विनिमयः प्रतीयत इति ।

परिसंख्यालंकारः —

"परिसंख्यानिषिध्यैकं एकस्मिन्वस्तु यन्त्रणम्"

यत्र एकस्मिन् वस्तुनि निषिध्यमानस्यैकस्यैववस्तुनो अन्यस्मिन्वस्तुनि यन्त्रणं प्रतीयते तत्र परिसंख्यालंकारः ॥

यथा वा —

रक्षत्यन्योनरेन्द्रः क्षितिं कनकमणीन्नैव धर्मं कदापि
श्रीमान् श्रीचोलनाथः शरभनरपतिः तान्सदा
सत्कृतिभ्यः ।
दत्वा पुष्णाति धर्मं श्रुति विहितमहा दानकृत्सन्ध्यजाया
स्तीरे तस्माद्वदान्यो न भवति भुवने दृश्यते श्रूयते वा ॥

अत्र अन्यो नरेन्द्रो योनुक्षिति कनकमणीन् रक्षतिः, यं च धर्मं कदापि न रक्षति तान् क्षित्यादिकान् दत्वा तं धर्मं श्रीचोलनाथश्शरभनृपतिः सदा रक्षतीत्युक्त्या रक्षणीयत्वेन मूढबुध्या

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

प्रसिद्धानां रक्षणकर्मत्व निषेधपूर्वकं धर्मान्यरक्षण रक्षणकर्मत्वाभि धानाद् एकस्मिन्निषिध्या अन्यस्मिन् वस्तुयन्त्रणं दृश्यत इति । अत्र निषेधस्त्वार्थिक इति ज्ञातव्यम् ।

विकल्पालंकारः —

"विरोधे तुल्यबलयोर्विकल्पालं कृतिर्मता"

यत्र तुल्यबलयोर्विरोधे तयोर्विकल्पेन ग्रहणं प्रतीयते तत्र विकल्पालंकारः ॥

यथा वा —

भजशरभ महीन्द्र वैरमुत्सृज्यराजन्
यदि तु सुखमनल्पं वाञ्छसित्वं क्षमायाम् ।
त्रिदिवमनुगतो वा याहिनो चेत्सुरेन्द्रं
शरणमुभयथा चेन्नैव सौख्यं न ते स्यात ॥

अत्र प्रत्यर्थि नृपतिं तदमात्योक्तिः । वैरमुत्सृज्य यदि क्षमायां श्रीशरभेन्द्र महाराजभजनं यच्चत्रिदिवे सुरेन्द्र भजनमेतेदेशतः कालतश्च सहानवस्थानरूप परस्परविरोधयुक्ते । समबलेच । अत्र तयोर्विकल्पः प्रतीयते । तथाहि हे विमतराज यदि तु त्वं अनल्प सुखंवाञ्छसि तदा क्षमायां वैरमुत्सृज्य श्रीशरभेन्द्रं भज । नोचेत् त्रिदिवं प्राप्य सुरेन्द्रं वा भजेदिति । तस्मात्तुल्यबलयोः विरोधे प्राप्ते तयोः अन्यतरस्य विकल्पेन ग्रहणं प्रतीयतेत्यत्र विकल्पालंकारः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

समुच्चयालंकार: —

"बहूनां युगपद्भाव भाजां गुंजस्समुच्च्य यः"

यत्रैकस्मिन्वस्तुनि युगपद्भावभाजां यौगपद्यशालिनां बहूनां गुञ्जस्समूहः प्रतीयते तत्र समुच्चयालंकारः ।

यथा वा –

दृष्ट्वा तुष्यति वाञ्छतिश्वसिति यं संमूर्च्छति श्रीमुत
श्रीमान्मञ्जुल मूर्तिरेष इति वै जानाति कान्ताजनः ।
अद्यागच्छति सिन्धुरोपरिलसत्पश्यामि तं हे सखी
त्युक्त्वा काचन कामिनी शरभभू नाथं समालोकते ॥

यदायं श्रीशरभेन्द्रमहाराजो गजमारुह्यागच्छति तदातान्तन पौरवृत्तान्तमाह - अत्र यौगपद्यभाजां अनेकेषां भावनां समूहः प्रतीयत इति ॥

अहं प्रथमिका भाजामेक कार्यान्वियोपिसः । यत्राऽहं प्रथमिका भाजां अहमेव प्रकृतकार्यं साधयामि । किमन्यैरित्यभिमानवतां-खेतरमनादृत्य प्रकृतकार्यं साधयतामिति यावत् । तेषां खलेकपोत-न्यायेन यद्येककार्यान्वयो दृश्यते तत्रापि सः समुच्चयः । तत्र समुच्चयालंकारः इत्यर्थः ॥

यथा वा —

अम्भोजबन्धुकुल जन्मकवेरकन्या-
तीरेश्वरत्वमखिलागम तत्त्वभावः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

दानेषु चोळविषयाधिपति महत्सु
संप्रेरयन्ति शरभेन्द्रममुं महान्तम् ॥ -१३२

अत्र महादान प्रेरणेऽम्भोजबन्धुकुल जन्मैकमेवकारणं इक्ष्वाकु-प्रभृतिषु तथा दृष्टत्वात् । एवं कवेरकन्यातीरेश्वरत्वमपि । कैमुत्यात् कावेरी च महापुण्येत्यादि भागवतवचनेन तत्तीरस्थानां सामान्य-जनानामपि: धार्मिकत्व प्रसिद्धे एवं अखिलागम तत्वभावेऽपि प्रसिद्धेः प्रकृतेत्वहं प्रथमिकाभावानां एतेषां त्रयाणामप्येककार्यान्वयो दृश्यत इति

कारकदीपकालंकारः –

"क्रमिकैकगतानान्तु गुम्भः कारकदीपकम्"

यत्र क्रमेणैकत्रस्थितानामर्थानां, गुम्भः सन्दर्भेणप्रतिपादनं प्रतीयते तत्र कारकदीपकालंकारः ॥

यथा वा –

आदौ पश्यति तं च पृच्छति सुखं तस्मै ददात्यादराद्-
ब्रूतेतं वचनं पुनश्चय बहुशो दास्यामि तुभ्यन्त्विति ।
इत्थं श्रीशरभेन्द्र भूपतिमणेश्चित्रं चरित्रं भवान्
शीघ्रं गच्छतु तन्निकेतनमहो प्राप्नोति
वित्तादिकान् ॥ -१३३

अत्र क्रमेणैकत्र गतानां दर्शनादीनां कुम्भः प्रतीयत इति ।
समाधिः कार्यसौकर्यं कारणान्तरसन्निधेः । यत्र केनचित्प्रारीप्सितस्य

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

कार्यस्य कारणान्तरसन्निधानं आद्यसौकर्यंभाति तत्र समाधिः। सम्यक् कार्याधानात्समाधिः। अयं च द्वितीय समुच्चय प्रतिद्वन्द्वी। तत्र बहूनां प्रत्येकं सप्तार्थनानां खलेकपोत न्यायेन युगपत्कार्य-साधनार्थमवतारः। अत्र तु एकेन कार्यजातेऽन्यस्य काकतालीय न्यायेन प्राप्तस्य तत्सौकर्याय आधायकत्वमात्रम्।

यथा वा —

मुधाचिन्तां त्यक्त्वा व्रजशरभ भूपाल निकटं
द्विजत्वं विप्रेभ्यो दिशति स महीं गां च कनकम्।
बुधोसित्वं यस्मादपि च नितरां तुभ्यमखिलं
ददात्यत्राशंकांत्यज दृढमतिं चाश्रय सखे॥ -१३४

अत्र शरभेन्द्र महाराजात्प्रतिग्रहरूपकार्यं मतिद्विजत्वमात्रं कारणमवगम्यते। विप्रेभ्योदिशतीत्युक्तेः। तत्र विद्वत्वस्य सह-कारिताचोत्तरार्धेन। एवं च अत्र द्विजत्वमात्रेण पारतार्थं प्रतिग्रहरूपे कार्ये विद्वत्वस्य सहकारित्वाभिधानेनास्य सौकर्यं प्रतीयत इति।

प्रत्यनीकालंकारः —

"प्रत्यनीकं बलवतश्शत्रोः पक्षेपराक्रमः"

बलवतः शत्रोः साक्षात्प्रतीपं कर्तुं अशक्तस्य पुरुषस्य तत्पक्षे तु तदनुसारिणि यः पराक्रमः तस्मिन् यत्प्रतीपकरणं यत्र प्रतीयते तत्र प्रत्यनीकालंकारः॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा –

पादांभोरुह सन्नखैर्विनिहता श्रेणिर्मणीनांरुचा
यस्य श्रीशरभेन्द्रभूपतिमणेराश्रृत्य तं भूभुजः ।
ये तिष्ठन्ति न मन्त्यमुं प्रतिदिनं तेषां किरीटावलिं
कृत्वाधश्चरणां बुजानुमतगां तिष्ठत्युपर्येव हि ॥-१३५

अत्र मणिश्रेण्याः रुचावलवच्छत्रोः श्रीशरभेन्द्रपादन खसमूहस्य-प्रतापं कर्तुमसमर्थायाः तदनुमतायां श्रीशरभेन्द्रपादोपरि निपतित राजकिरीटावल्यां पराक्रमोदृश्यते यतस्तामधः कृत्वातस्योपरि स्वस्य अवस्थानं प्रतीयत इत्यतो बलवतशत्रोः पक्षेपराक्रमो दृश्यत इति ॥

अर्थापत्त्यलंकारः –

"कैमुत्येनार्थ संसिद्धिः काव्यार्थापतिरिष्यते"

यत्र स्वाभिमतस्यार्थस्य कैमुत्येन दण्डापूपन्यायेन समिद्धिः प्रतीयते तत्र काव्यार्थापत्यालंकारः तान्त्रिकाभिमतार्थापत्ति व्यावर्त-नायकाव्येति विशेषणम् ।

यथा वा –

दुग्धाब्धिर्निष्कलङ्को विततिमधिगतो निर्जितो
व्याप्तकीर्त्यान्
आ संकीर्तेस्समोहंत्विति निनदमिषेणोर्मिरूपान्
स्वहस्तान् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

उद्धृत्याक्रोशतीन्दोश्शरभनरपतेः कीर्तिसाम्यं त्रिलोक्यां
को वा वक्त्याद्यसूनोः ननु लघुवपुषः तस्य
साम्यं कस्य मर्त्यः ॥ १३६

अत्र निष्कलंकोविस्तीर्णः क्षीराब्धिर्व्याप्तया श्रीशरभेन्द्रमहाराज कीर्त्या निर्जितस्सन्नूर्मिरूपान् स्वकरानुधृत्य नाहं तस्य राज्ञः कीर्तेस्सम आसमित्याक्रोशति तस्य क्षीराब्धेः स तु स्वयाल्पशरीरस्य कलंकिनश्चन्द्रस्य त्रिलोक्यां को वा मर्त्यः साम्यं किं इत्युक्त्या, महामल्लनशभङ्गन्यायेन अस्य चन्द्रस्य पितोऽपि महान्कलंकी च क्षीराब्धिः स्व करानुधृत्यानया व्याप्तया श्रीशरभेन्द्रमहाराजकीर्त्या निर्जितोहमिति निनदमिषेण सदारटत्यल्पसारःकलंकोचायं कियानित्यन्ताधम्यं अस्य प्रतीयत इति ।

काव्यलिंगालंकारः -

"समर्थनीयस्यार्थस्य काव्यलिंगं समर्थनम्"

यत्र स्वेन साधनीयस्यार्थस्य सहकारिवशात् समर्थनं प्रतीयते तत्र काव्यलिंगालंकारः । व्याप्तिपक्षतादिसापेक्षे नैय्यायिकलिंग व्यावर्तनाय काव्यविशेषणं ॥

यथा वा -

तिष्ठत्यत्रैष दाता शरभनरपतिर्मायुरेवाधुनानो-
दैन्यत्वं बाधव्या रे व्रजत्रिमतमते त्वामहं पीडयामि ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

मच्छक्तिं पश्ययस्त्वां श्रुतिविषयगतं संहरत्याश्रु मह्यं
दत्वा रक्षत्यभीष्टादधिकमपि महाराजमुद्घोषयामि ॥

अत्र स्वसमर्थनीय दैन्य जयरूपार्थस्येदृशमहाराजमुद्घोषयामीत्यनेन समर्थनं कृतमिति ॥

अर्थान्तरन्यासालंकारः —

" उक्तिरर्थान्तरन्यासस्स्यात्सामान्यविशेषयोः "

यत्र सामान्यविशेषयोः, विशेषसामान्ययोः द्वयोरपि युक्तिः तत्र अर्थान्तरन्यासालंकारः । तयोश्चैकं प्रस्तुतमन्यदप्रस्तुतं भवती ततश्च विशेषे प्रस्तुते तेन सहाप्रस्तुतसामान्यरूपस्य सामान्ये प्रस्तुते तेजं सहाप्रस्तुत विशेषरूपस्य वा अर्थान्तरस्यान्यसनं अर्थान्तरन्यास इत्युक्त भवति ।

तत्राद्यो यथा —

करोतिन्दानानि महन्ति चोलभू
सम्राडिति प्राह भवान्वचश्च यत् ।
न चित्रमेतद्रविवंशजन्मनां
किं वास्त्यलभ्यं भुवने महात्मनाम् ॥ -१३९

अत्र महादानप्रकरणरूपे विशेषे प्रस्तुते, तेन सहाप्रस्तुतस्य रविवंशजन्मनां स्वाऽधीनाशेषकार्यत्वरूप सामान्योक्तिर्दृश्यत इति ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

द्वितीयो यथा –

अल्पोऽपि चोलविषयाधिपसेवनेन
यातिं प्रभुत्वमहितावनिनाथसूनुः ।
लब्ध्वा धनानि शरभेन्द्ररसाधिनाथात्
पुष्णाति भृत्यनिचयं सुखमेधते च ॥ -१४०

अत्र पूर्वोक्तेन सामान्येन प्रस्तुतेन सहोत्तरार्धेऽप्रस्तुतस्य तद्विशेषस्य उक्तिर्दृश्यते इति ॥

विकस्वरः –

"यस्मिन्विशेषसामान्यविशेषास्स विकस्वरः."

यत्र यस्मिन्विशेषे सामान्यविशेषौ उच्येते, तत्र विकस्वरः । कस्मिंश्चिद्वस्तुनि कस्यचित् विशेषस्य समर्थनार्थं सामान्यमुपन्यस्य तत्प्रसिद्धावपि अपरितुष्यता कविना तत्समर्थनाय पुनर्विशेषान्तरं उपमानीकृत्यार्थान्तरं न्यस्यते तत्र विकस्वरालङ्कारः इति भावः ।

यथा वा –

नैवाप्नोति पराभवं रिपुकुलैः प्रद्योतनस्यान्वये
जातश्श्रीशरभेन्द्र भूपतिमणिर्विक्रान्तिमन्तो हि ते ।
जेतारश्च रघूद्वहेन सदृशः शौर्ये धृतौ भेदने ।
शत्रूणां च ततोप्ययं विमतभूनाथेभ कण्ठीरवः ॥ -१४१

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अत्र वर्णनीये राज्ञि शत्रुभ्यः पराभवरूपस्य कस्यचिद्विशेषस्य समर्थनार्थं जेतृरविवंशजन्मरूपं सामान्यमुपन्यस्य तत्प्रसिद्धावप्यपरितुष्यता कविना पुनस्तत्समर्थनाय तद्विशेषेण श्रीरामचन्द्रेण शौर्यादिविषये साम्यमुक्त्वा ततोऽपि पराभवाऽभावस्साधित इति ॥

प्रौढोक्तिः –

"प्रौढोक्तिरुत्कर्षहेतौ तद्धेतुत्व प्रकल्पनम्"

यत्र कार्यातिशयाहेतौ तद्धेतुत्वप्रकल्पनं प्रतीयते तत्र प्रौढोक्तिः ।

यथा वा –

आदायेन्द्र सुतांशमम्बुजसुहृत्पुत्रांशमप्यात्मभूः
शौर्योद्रिक्त विपक्षकक्षहरण प्रख्यातदोर्मण्डलम् ।
दातारं सकलेष्टसाधनपयोवाञ्छ्युथितोर्वीरुह-
श्रीमन्तं भगवान्ससर्जशरभक्ष्मापाल चूडामणिम् ॥

अत्रेदृशगुणविशिष्ट श्रीशरभेन्द्रमहाराज सर्जनहेत्वोः अर्जुन-कर्णांशयोः हेतुत्वपरिकल्पनं दृश्यत इति ॥

सम्भावना: –

"सम्भावना यदित्थं स्यादित्यूहोऽन्यस्य सिद्धये"

यत्र यस्मिन्नन्यस्यार्थविशेषस्य सिद्ध्यर्थं यदित्थं स्यात्तत्तथा स्यादित्यूहः प्रदृश्यते तत्र सम्भावनालङ्कारः ।

श्रीCC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा ।

शेषो यद्यभवं तदैव शरभक्ष्मापालचूडामणे
शक्तस्त्वद्गुणबृन्दराशिगणने शक्रो यदास्यां तदा ।
दक्षोऽहं तत्र सिद्धिभूतिमधिकां द्रष्टुं न चेन्मानुषः
शक्तारस्यां कथमत्र कोऽपि भुवने नास्त्येव
तादृग्विधः ॥ -१४३

अत्र यद्यहं शेषः स्यां शक्रोऽपि तदा त्वद्गुणराशिगणने तथा त्वदीयसम्पद्दर्शने च शक्तस्स्याम् । न चेन्नत्युक्त्याऽन्य-सिद्धयेऽन्यस्य ऊहः प्रतीयत इति ।

मिथ्याध्यवसितिः –

"किञ्चिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थान्तर कल्पनम् ।
मिथ्यावसितिः"

यत्र कस्यचिदर्थस्य मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थान्तरकल्पनं दृश्यते तत्र मिथ्याध्यवसितिः ।

यथा वा –

चोलेशाननुगावनीशजयिनं जेतुं यदा तं भवान्
वाञ्छत्याहव पण्डितैर्निजभटैर्वन्ध्यासुतैस्संवृतः ।
धृत्वा हेतिकुलं नृशृङ्गरचितं गन्धर्वशृङ्गस्थले
स्थित्वा याहि जयं विभूतिमधिकां प्राप्नोति
नोचेन्नहि ॥ -१४४

CC-0. Saraswati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

अत्र विपक्षक्षितिपसम्बन्धिनो मिथ्याभूतस्य जयस्य प्राप्त्यर्थं मिथ्याभूतनथृङ्गायुधादिरूपार्थान्तरकल्पनं दृश्यत इति ॥

ललितम् –

"प्रस्तुते वर्ण्ये वाक्यार्थे प्रतिबिम्बस्य कल्पनम् ।
ललितम्"

यत्र प्रस्तुते धर्मिणि यो वर्णनीयो वाक्यार्थः तमवर्णयित्वा तत्रैव तत्स्वरूपस्य कस्यचित् अप्रस्तुत वाक्यार्थस्य वर्णनं तत्र ललितालङ्कारः ।

यथा वा –

निरीक्ष्य चोलेशमनङ्गरूपिणं
निपीडितां कामशरेण काञ्चन ।
सखी बभाषे त्वमितीन्दुमण्डलं
स्प्रष्टुं करेणेच्छसि मूढचेतने ॥ -१४५

अत्र चोलेशदर्शनेनाङ्गपीडितां तत्परिरम्भणमाकाङ्क्षमाणां नायिकां दृष्ट्वा सखी ! तव श्रीचोलेशङ्गमो भवतीति प्रस्तुतं अवर्णयित्वा तद्विपरीतप्रतिबिम्बस्य करेणेन्दुमण्डल संस्पर्शनस्य वर्णनं कृतवती इत्युक्त्या प्रस्तुते वर्ण्यवाक्यार्थे प्रतिबिम्बस्य वर्णनं दृश्यत इति ॥

प्रहर्षणम् –

"उत्कण्ठितार्थसंसिद्धिर्विना यत्नं प्रहर्षणम्"

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यत्र यत्नं विना उत्कण्ठितार्थसंसिद्धिः प्रतीयते तत्र प्रहर्षणालङ्कारः । उत्कण्टेच्छाविशेषः ।

श्लोकः –

सर्वेन्द्रियसुखाऽस्वादो यत्राऽस्तीत्यभिमन्यते ।
तत्प्राप्तीच्छां विसङ्कल्पां उत्कण्ठां कवयोविदुः ॥

इत्यभिधानात् ॥

यथा वा –

दृष्ट्वाब्जमार्गणसमं सखि पुष्पबाण-
सम्पीडितास्स्फुटसिताम्बुज सुन्दराक्ष्यः ।
उत्कण्ठिताऽभवसमये चिरकालतोऽहं
द्रष्टुं समागत इहाद्य स चोलसम्राट् ॥ -१४६

अत्राद्य चोलसम्राधिहागत इत्युक्त्या यत्नं विना उत्कण्ठितार्थसंसिद्धिः प्रतीयत इति ।

"वाञ्छितादधिकार्थस्य संसिद्धिश्च प्रहर्षणम्"

यत्र स्वापेक्षितार्थादप्यधिकार्थस्य संसिद्धिः प्रतीयते तत्र प्रहर्षणालङ्कारः ।

यथा वा —

वदान्यमभियाचते वितममित्र गर्वापहं
बुधोऽधिकमसौ धनं दिशति चोलभूमीश्वरः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

जनाय जलदो यथा भुवनमम्भसा पूरयत्
अहो ! विहगशावकैरतिजलार्थिभिर्याचितः ॥ -१४७

अत्र स्वापेक्षितार्थादधिकार्थस्य संसिद्धिः प्रतीयत इति ।

विषादनम् –

"इष्यमाणविरुद्धार्थसम्प्राप्तिश्च विषादनम्"

यत्र स्वस्येष्टार्थस्य विरुद्धो योऽर्थः तस्य संप्राप्तिः प्रतीयते तत्र विषादनालङ्कारः ॥

यथा वा –

गच्छामि चोलविषयाधिपतेस्समीप-
मायोधनं च रचये विमतावनीशे ।
इत्थं विचिन्तयति तञ्जपुरीशभृत्या-
स्सम्प्राप्य राज्यमपजह्रुरशुद्धबुद्धेः ॥ -१४८

अत्र स्वेष्टविरुद्धार्थः प्रतीयतः इति ॥

उल्लासः -

"एकस्य गुणदोषाभ्यामुल्लासोऽन्यस्य तौ यदि"

यत्रैकस्य गुणदोषाभ्यां अन्यस्य गुणदोषौ प्रतीयते तत्रोल्लासालङ्कारः । एक निष्ठगुणादन्यस्य तादृशगुणप्रतीतिः एकनिष्ठदोषादन्यस्य तादृशदोषप्रतीतिरिति विवेकोऽत्रानुसन्धेयः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा —

भूत्वा गन्धी नभस्वान्यकितमृगदृशां पद्मवक्त्राभियोगा-
न्मन्दं मन्दं मनोजं मनसि विरचयन्याति तञ्जापुरेऽस्मिन् ।
यूनां संवीक्ष्य काञ्चिद्विमलशशिमुखी मोहितानात्मचित्तान्
ज्ञात्वा तान्हावभावैः कुसुमशरहता मौढ्यमत्यन्तमाप ॥

अत्र पूर्वार्द्धे मुखस्यैकस्य गन्धरूपगुणात्तदन्यस्य नभस्वतः गन्धरूपो गुणो दृश्यत इत्येकगुणादन्यस्य गुणप्रतीतिः । उत्तरार्धे तु विटपुरुषनिष्ठविरहजनित मौढ्यरूपदोषात्तदन्यस्यां नायिकायां तादृशदोष प्रतीतिरिति अन्यदोषादन्यत्र दोषप्रतीतिश्चेति ॥

अवज्ञा —

"ताभ्यां तौ यदि न स्यातामवज्ञालङ्कृतिस्तु सा"

यत्र ताभ्यां गुणदोषाभ्यां तौ गुणदोषौ यदि न स्यातां एकनिष्ठाद्गुणादन्यत्र तादृशो गुणः, दोषो वा नोपलक्ष्यते तत्राव-ज्ञालङ्कार इत्यर्थः ।

यथा वा –

अरुणजलजपाणेस्तावकीनः प्रतापः
समजनि शरभाख्यक्ष्मापते रक्तिमानम् ।
भजति न तु यशस्ते तादृशं किन्तु शौक्ल्यं
दधति ननु विचित्रा सृष्टिरादृश्यतेऽद्य ॥ -१५०

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

एकनिष्ठगुणादन्यत्र तादृशो गुणो भवतीत्यत्र निदर्शनं पूर्वार्धेनोक्त्वा, द्वितीयार्धेन तदभाव उक्तः । एवं च अत्र एकनिष्ठगुणादन्यत्र तादृग्गुणाभावः प्रतीयत इति ।

क्षेपं कुर्वति भूधरेऽहितकरे त्वय्यब्धिकल्पे विभौ
राजन्भोसल वंश मौक्तिकमणे तेभ्यो नचैवेर्ष्यति ।
इष्टार्थान्प्रददाति च प्रभुकुलाधीशो भवान्सूनवे
माता नेर्ष्यति तद्वदेव हि महान्मोदश्चयेन विद्वेषिणे ॥

अत्र एकनिष्ठेर्ष्यालक्षणदोषात् तदन्यत्र तदभाव उच्यत इति ।

"दोषस्याभ्यर्थनानुज्ञा तत्रैव गुणदर्शनात्"

अभ्यर्थना अनुज्ञाप्राप्त्यभ्युपगमः । तत्रैव दोष एव । एवं च यत्र गुणलाभार्थं दोषाभ्युपगमः प्रतीयते तत्राप्यनुज्ञालङ्कार इत्यर्थः ।

यथा वा —

न मे भूयात्सङ्गस्सखि शरभभूपालकमणेः
यतो मूर्तिर्दिव्या लसति हृदये ध्यानविषयः ।
यदि स्यात्स्मृत्वा तां सुखजलधिमग्ना कथमहं
भवेयं दृष्ट्वा ये चलितहृदया कामवशगा ॥ - २५२

अत्र श्रीशरभेन्द्रमहाराजसमागमं आकाङ्क्षमाणायाः तदभावो दोषः तथापि तदभ्युपगमः तत्स्मृतिजनित सुखपारावारविहरणरूप गुणप्राप्तिजनक इति गुणमुद्दिश्य दोषाभ्युपगमः प्रतीयत इति ॥

CC-0, Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

लेशः –

"लेशस्स्याद्दोषगुणयोर्गुणदोषत्वकल्पनम्"

यत्रैकनिष्ठस्य दोषस्य गुणस्य वा गुणत्वं दोषत्वं वा कल्प्यते । एकपदार्थनिष्ठौ दोषगुणौ तत्रैव गुणदोषयोः प्रयोजकौ भवत इति यावत् । तत्र लेशालङ्कारः ।

यथा वा –

बुधानां सद्धर्मो जनयति गुणो दैन्यमधिकां
विभूतिं तत्त्वेषु प्रचयति पूर्वं हि कृतिनः ।
बभूवुर्दीना ये कुमतिनृकुलाधीश भजना-
द्विभूत्या पूर्णास्ते सपदि शरभेन्द्रेक्षणबलात् ॥ - १५३

अत्र विबुधजननिष्ठयोः विबुधत्वदैन्यरूपयोः गुणदोषयोः तत्रैव अन्यकुमतिनरपतिभजन श्रीशरभेन्द्रमहाराजेक्षण बालाभ्यां प्राप्तयोः दैन्यमहाविभूत्योः प्रयोजकत्वं उपलब्धमिति ॥

मुद्रा –

"सूच्यार्थ सूचनं मुद्रा प्रकृतार्थपरैः पदैः"

यत्र प्रकृतार्थपरैः पदैः स्वेन सूचनीयस्यार्थस्य सूचनं प्रतीयते तत्र मुद्रालङ्कारः ।

यथा वा –

चोलेशं वरखड्गपाणिमसुहृत्कालाख्यमुर्वीश्वराः
प्रापुस्त्वां नगरीं निरीक्ष्य चकिताश्शार्दूल विक्रीडितम् ।

CC-0TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नेमुर्ये विमतावनीशवशगास्ते तस्य पादाम्बुजं
नालं योद्धु महीनतावकभटैरित्थं वदन्तो वयम् ॥ -१५४

अत्र अस्मिन् श्लोके कविना सूच्यार्थस्य शार्दूलविक्रीडितवृत्तस्य प्रकृतार्थपरेण शार्दूलविक्रीडितमिति विशेषणपदेन सूचनं कृतमिति ॥

रत्नावली —

"क्रमिकं प्रकृतार्थानां न्यासं रत्नावलीं विदुः"

यत्र प्रसिद्धसहपाठानां अर्थानां क्रमेण न्यासः प्रतीयते तत्र रत्नावल्यलङ्कारः ।

यथा वा —

सद्भूतिर्जातमात्रं सकलमपि भवान्वेति सद्वंशजन्मा
भानोर्यत्खड्गपाणिश्शरभनरपते वाहिनीनायकश्च ।
लोकानां प्राणभूतो बहुधनभरितस्सर्वतत्वार्थवेदी
तस्मात्त्वां प्रोचुरुच्चैर्विमलमुनिगिरस्सर्वदिक्पालरूपम् ॥

अत्र प्रसिद्धानामिन्द्रादीनां अष्टदिक्पालानां क्रमेण निवेशनं दृश्यत इति । तदुक्तम् - "अष्टाभिर्लोकपालानां मात्राभिर्निर्मितो नृपः" इति ॥

तद्गुणः —

"तद्गुणस्स्वगुणत्यागादन्यदीयगुणग्रहः"

यत्र यस्य वस्तुनः स्वगुणत्यागादन्यदीगुणग्रहणं दृश्यते तत्र तद्गुणालङ्कारः ।

TMSSML Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा —

यदा नमन्त्येनमहीनविक्रमं
भूमीश्वराश्चोलपतिं तदैव ।
मूर्धन्य रत्नानि बभूवुरुच्चकैः
नखत्विषा पाण्डुरतारका इव ॥ -२५६

अत्र भूमीश्वराणां श्रीशरभेन्द्रमहाराजपादारविन्दयोः नमनकाले तदीयमूर्धन्यरत्नानि नखत्विषा तारका इव भूवुरित्युक्त्या स्वगुणपरित्यागेन अन्यगुणग्रहणं तेषां प्रतीयत इति ॥

पूर्वरूपम् —

"पुनस्स्वगुणसम्प्राप्तिः पूर्वरूपमुदाहृदम्"

यत्र कस्यचिद्वस्तुनो वस्त्वन्तरसंसर्गेण तद्गुणप्राप्तिः, पश्चात् तदपगमे स्वगुणप्राप्तिश्चदृश्यते तत्र पूर्वरूपालङ्कारः ।

यथा वा —

नत्वा पदाम्भोरुहमुत्थिता यदा
ते भूमिनाथाश्शरभेन्द्रभूपतेः ।
मूर्धन्यरत्नानि पुनर्निजां रुचिं
निसर्गसिद्धां परिलेभिरे तदा ॥ -१५७

अत्र मूर्धन्यरत्नानां पुनस्स्वरूपसंप्राप्तिः दृश्यत इति ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

"पूर्वावस्थानुवृत्तिश्च विकृते सति वस्तुनि"

लक्षणे चकारात्पूर्वरूपमिति लक्ष्यवाचकपदानुवृत्तिः । एवं च यत्र कस्मिंश्चिद्वस्तुनि विकृतेऽपि तत्र पूर्वावस्थाया अनुवृत्तिः । पूर्वं येन वस्तुना यद्वस्तु यादृशमुपलब्धं तेन वस्तुना विनापि वस्त्वन्तरेण पूर्ववत्प्रतिभाति तत्राऽपि पूर्वरूपानुवृत्तिरित्यर्थः ।

यथा वा --

राधेये त्रिदिवं गतेऽपि भुवनेत्युक्त्वा जनानर्थिनो
तस्मादप्यधिकं ददाति शरभक्ष्मापालचूडामणिः ।
तेभ्यश्शन्तनुनन्दनेऽपि निहते सेनाप्यवन्यावसा-
वाचन्द्रं परिपालयन्वसति भूनाथोऽत्र तञ्जापुरे ॥ १५८

अत्र पूर्वं भूमण्डलं वदान्येन राधेयेन सेनाध्यक्षेण शन्तनुनन्दनेन चोल्लसितमभूत् । इदानीं तयोरभावेऽपि तदन्येन वदान्येन सेनाध्यक्षेण च श्रीशरभेन्द्रेण पूर्ववदाचन्द्रं उल्लसतीत्युक्त्या भूमण्डलस्य कस्मिंश्चिद्वस्तुनि विकृतेऽपि पूर्वावस्थानुवृत्तिः दृश्यत इति ॥

अतद्गुणः --

"सङ्गतान्यगुणानङ्गीकारमाहुरतद्गुणम्"

येन वस्तुना सङ्गतं यत् वस्त्वन्तरं तन्निष्ठो यो गुणः तस्यानङ्गीकारोऽनभ्युपगमः । अन्यसंसर्गेणान्यस्मिन् अन्यगुणप्रतिफलनान-

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

भ्युपगम इति यावत् । तस्मिन्नेतस्मिन्नेव सति अतद्गुणालङ्कार इत्यर्थः ।

यथा वा —

अन्यस्मिन्नन्यनिष्ठः प्रतिफलति गुणो दुर्बले किं न तिष्ठे
बिम्बोष्ठे कामिनीनां प्रतिफलति सुधापाण्डिमा

तद्गतस्थः ।

एवं भूपालचूडामणिगणविलसद्रश्मिमासन्नवोधे
नासीच्छ्रीचोलदेशप्रभुवरशरभक्ष्मापतेः

स्वच्छकान्तौ ॥ १५९

अत्र अन्यसंसर्गेण अन्यस्मिन्नन्यगुणप्रतिफलनाभावः प्रतीयत इति ॥

ननु च अन्यगुणेन अन्यगुणोदयानुदयरूपाभ्यां उल्लासावज्ञा-रूपाभ्यां अनयोः तद्गुणाऽतद्गुणयोः को भेदः ? अन्यसंसर्गेण अन्यस्मिन्नन्यगुणोत्पत्तितदभावयोः तत्राऽपि सत्वादिति चेत् न, उल्लासावज्ञारूपालङ्कारलक्षणघटको गुणशब्दः सामान्यतोऽलङ्कारशास्त्रे गुणत्वेन प्रसिद्धा ये धर्माः तत्परः । तद्गुणाऽतद्गुणलक्षण घटक-गुणशब्दस्तु तद्विशेषरूपपरः । अतस्ताभ्यां नानयोरभेदः शङ्कनीयः । उक्तविवक्षानुसारेणैव उदाहरणोपादानात् । विस्तरस्तु ग्रन्थगौरव-भयादुपरम्यते ।

" प्राक्सिद्धस्वस्वगुणोत्कर्षानुगुणः परसन्निधेः "

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यत्र यस्य वस्तुनः प्राक्सिद्धो यस्स्वगुणः तस्य यदौत्कर्षं तदनुगुणो यो गुणः परसन्निधानात्प्रतीयते तत्राऽप्यतद्गुणालङ्कारः ।

यथा वा –

सार्वज्ञं शरभेन्द्रभूपतिमणेस्स्वाभाविकं वेत्ययं
यस्मात्सर्वमितो हि तच्चदृढतां याति प्रसिद्धो हरः ।
तत्वेनात्मनि चित्तवृत्तिविषयो भूत्वा स्फुरत्यात्मनः
तादात्म्येन ततस्तुते प्रकृतिगे चैक्यं
गतेऽन्योन्यतः ॥ -१६०

अत्र श्रीशरभेन्द्रभूपतिमणेस्सार्वज्ञं प्राक्सिद्धम् । स्वाभाविकत्वात् । तत्र च श्रुतिः प्रमाणम् । प्राक्सिद्धस्य सार्वज्ञस्य यद्दाढर्च्यरूपमौत्कर्षं तद्वस्त्वन्तर सन्निधानाद्भवति । तथाहि – यतस्तत्वेन सर्वज्ञत्वेन प्रसिद्धो हरः श्रीशरभेन्द्रमहाराजचित्तवृत्तिविषयो भूत्वा स्वात्मनस्तादात्म्येना-स्यात्मनि स्फुरति । अनयोः शिवराज्ञोः प्रकृतिगते ते च सर्वज्ञत्वेऽन्योन्यमैक्यं गते भवत इत्यतः प्राक्सिद्धं स्वगुणौत्कर्षं वस्त्वन्तर-सन्निधानात्प्रतीयत इति ॥

मीलितम् –

"मीलितं यदि सादृश्याद्भेद एव न लक्ष्यते"

यत्र कयोश्चिद्वस्तुनोः कान्तिसादृश्यात् भेद एव न लक्ष्यते तत्र मीलिताऽलङ्कारः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा -

मृगीदृशां स्वर्णविभूषणेभ्यो
नालक्षि भेदः शरभाधिपस्य ।
प्रभासुताश्चम्पकदामगौर्यो
यतो बभूवुर्जलजाननास्ताः ॥ -१६१

अत्र स्त्रीणां स्वर्णविभूषणेभ्यो प्रभाविषये भेदो न दृश्यत इति ॥

सामान्यम् —

"सामान्यं यदि सादृश्याद्विशेषो नोपलक्ष्यते"

यत्र विशेषस्य सामान्येन सादृश्यात् व्यावर्तकधर्मादर्शनपूर्वकं तत्त्वेनादर्शनं प्रतीयते तत्र सामान्यालङ्कारः ।

यथा वा —

नालक्षि चोलाधिपकामिनीनां
मुखाभिधेभ्यः शशिमण्डलेभ्यः ।
इन्दोर्विशेषो वरहर्म्यभागे
सञ्चारिणीनां स्मितचन्द्रिकेभ्यः ॥ -१६२

अत्र सामान्येन मुखेन सादृश्याद्विशेषस्य चन्द्रमण्डलस्य व्यावर्तकधर्मादर्शनपूर्वको भेदानवभास इति ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

उन्मीलितविशेषकौ –

" भेदवैशेष्ययोरस्फूर्तावुन्मीलितविशेषकौ "

यत्र ययोः पदार्थयोः रूपसादृश्याद्भेदाप्रतीतिः तत्र तयोः कस्माच्चित्कारणात् भेदस्फूर्तिः, तत्र मीलितप्रतिद्वन्द्वि उन्मीलितम् । यत्र कयोश्चिन्मध्ये कस्यचिद्वस्तुनो विशेषास्फूर्तिः, तत्र कस्माच्चित्कारणात् विशेषाभावभासः, तत्र सामान्यप्रतिद्वन्द्वी विशेषः ।

यथा वा –

भेदस्समालक्षि विभूषणस्थो
रुचा मणीनां कनकप्रभाणाम् ।
विधोर्मुखेभ्यो ननु चोलनाथ-
कीर्त्या परीभावमवेक्षमाणैः ॥ -१६३

अत्र पूर्वार्धेन कनकप्रभाणां स्त्रीणां विभूषणस्थो यो भेदः स मणीनां रुचासमालक्षीत्युक्त्या रूपसाम्यात्पूर्वमपरिज्ञातस्य स्त्रीणां विभूषणानां च भेदस्य मणिकान्तिरूपात्कस्माच्चित् कारणात्प्रतिभास इत्यतोऽत्रोन्मीलितालङ्कारः । उत्तरार्धे तु आह्लादकारित्वरूप-सामान्येन मुखेभ्यो विधोर्विशेषाज्ञाने श्रीचोलनाथःकीर्त्या परिभावरूपात् कस्मिंश्चित्कारणात् विशेषस्य प्रतिभास इत्यतोऽत्रविशेषालङ्कारः । राजस्त्रीमुखचन्द्राणां राजकीर्त्योल्लासाधिक्यदर्शनेन तत्परीभावस्य चन्द्र-मात्रनिष्ठत्वात् । भिद्यतेऽनेनेति भेदो व्यावर्तकधर्म इत्यस्मिन्पक्षे भेदशब्दार्थो व्यावर्तकधर्मः । पूर्वत्र तु भेद इति विवेको द्रष्टव्यः ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

गूढोत्तरम् —

"किञ्चिदाकूतमहितं स्याद्गूढोत्तरमुत्तमम्"

यत्र केनचित्प्रश्ने कृते तस्याऽऽकूतेन महितमुत्तरं प्रतीयते तत्र गूढोत्तरालङ्कारः ।

यथा वा —

दृष्ट्वा नमन्तं पदयोर्महामतिः
चोलेश्वरो वाक्यमुवाच भूपतिम् ।
क्षेमं किमित्याह पुनः पुनश्च सो
जीवामि राजन्निति भावगर्भितम् ॥ १६४

यदा पराजितः प्रत्यर्थिभूपालो श्रीशरभेन्द्रमहाराजशरणमाप्तवान् । तदानीन्तनवृत्तान्तमाह । क्षेममित्यनेनोक्ते तस्य पुनश्च जीवामि राजन्निति भावगर्भितं उत्तरमाहेत्यनेन त्वद्विप्रकारिणो जीवतो मम क्षेममेव नास्तीति तदीयाभिप्रायः सूच्यत इत्याकूतं अहितमुत्तरमत्र प्रतीयतेति ॥

चित्रोत्तरम् —

"प्रश्नोत्तरान्तराभिन्नमुत्तरं चित्रमुत्तरम्"

यत्र प्रश्नोत्तरान्तरमन्तरा प्रश्नाभिन्नमुत्तरं प्रतीयते तत्र चित्रोत्तरालङ्कारः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा ।

कामितार्थप्रदा मूर्तिः शरभेन्द्रमहीपतेः ।
तामहं चेत्सुखे सम्यगाश्रयामीष्टसिद्धये ॥ -१६५

अत्र कामितार्थप्रदा मूर्तिः कः ? इति प्रश्नस्य शरभेन्द्रभूपतेः कामितार्थप्रदामूर्तिरिति प्रश्नाभिन्नमुत्तरं प्रतीयत इति ॥

सूक्ष्मम् –

" सूक्ष्मं पराशयाभिज्ञेतरसाकूतचेष्टितम् "

पराशयाभिज्ञविषये शीघ्रमाकूतचेष्टितं भावगर्भचेष्टितं यत्र प्रतीयते तत्र सूक्ष्माभिधं अलङ्कारान्तरमित्यर्थः ।

यथा वा –

काचिन्मां प्रसमीक्ष्य चन्द्रवदना धम्मिल्लमादर्शय-
द्वेलानिश्चयकामुके सतितिरोव्यावर्तयत्तन्मयि ।
वक्त्रं तञ्जपुरेऽम्बुजन्म सुदृशां चातुर्यमन्यादृशं
स्त्रीरत्नानि विलोकितानि न मया दृष्टेदृशी
जानती ॥ -१६६

कामुकस्यावलोकनेन सङ्केतकालप्रश्नभावं जानन्त्या तया धम्मिल्लप्रदर्शनरूपं यच्च मुखतिरोव्यावर्तनरूपं चेष्टितं कृतं तदाकूत-चेष्टितम् । रात्रावागतायां तत्राऽपि चन्द्रस्य परिवर्तने च सति

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सङ्केतकाल इत्याकूतम् । एव चात्र पराशयाभिज्ञ आकूतचेष्टितं प्रतीयत इति ॥

पिहितम् –

"पिहितं परवृत्तान्तज्ञातुः साकूतचेष्टितम्"

अत्र चिह्नादिना परवृत्तान्ताभिज्ञस्य पुरुषस्य साकूतचेष्टितं प्रतीयते तत्र पिहितालङ्कारः ।

यथा वा –

दूरात्स्वान्तिकमागतान्बुधजनान्दृष्ट्वा ददात्यादरात्
तेभ्यो भूरिसुखं च पृच्छति हसन्नर्थीष्टकल्पद्रुमः ।
चोलेशश्शरभेन्द्रभूपतिमणिमणिर्ज्ञात्वोचितार्थाञ्जना-
नूक्षत्यस्य समो नचाऽस्ति नृपतिः
कश्चित्त्रिलोक्यामपि ॥ १६७

अत्र ज्ञातुः श्रीशरभेन्द्रभूपतिमणेः दूरात्स्वान्तिकमागतेभ्यो बुधेभ्यो यद्दानरूपं चेष्टितं तत्रेदमाकूतम् । एते परिश्रान्ताः दूरान्मामुद्दिश्य मत्समीपं प्रत्यागताः । तस्मादेतान्परिपालयामि इति ॥

व्याजोक्तिः –

"व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनम्"

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यत्र कारणविशेषात्प्राप्तस्याकारविशेषस्य कारणान्तरोक्त्या यद्गोपनं प्रतीयते तत्र व्याजोक्त्यलङ्कारः ।

यथा वा —

सन्नासि त्वं घनरसे चिरं कालानलोपमः ।
सकम्पं बाधते बाले ज्वरस्त्वां किं वदाम्यहम् ॥

अत्र चोलदेश दर्शनेन मोहितां तत एव मदनज्वरेण पीडितां पतिसमीपस्थां सखीमन्यथाज्ञातुस्तस्य प्रत्ययनार्थं नायिकावृत्तान्तं जानती तद्गोपनेन वृत्तान्तान्तरं ब्रूते । यतस्त्वं घनरसे चिरं मग्नासि । अतस्त्वां कालानलोपमो ज्वरो बाधते इति । एवं चानया वचो-भङ्ग्या ज्वररूपस्याकारविशेषस्य घनरसनिमज्जनरूपकारणान्तरोपन्यासेन मदनपूर्वकत्वस्य गोपनं प्रतीयत इति । न च तथ्यनिह्नवाच्छेका-पह्नुतिरिति वाच्यम् । यत्र स्वोक्तस्यार्थान्तरपरत्ववर्णनेन तथ्यनिह्नवः तत्र छेकापह्नुतिः । यत्र स्वेन सम्प्राप्तस्य आकारविशेषस्य कारणान्तरोपन्यासेन तथ्यनिह्नवः तत्र व्याजोक्तिरिति भेदात् ॥

गूढोक्तिः —

"गूढोक्तिरन्योद्देश्यं चेद्यदन्यं प्रति कथ्यते"

यत्र किञ्चिद्वस्तूद्दिश्य तदन्यत् वस्तु प्रति कमप्यर्थविशेषं मनसि निधाय कश्चिद्वक्ति तत्र गूढोक्तिः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा –

तूष्णीं शुकास्स्व रसपूर्णफलं वरिष्ठं
दृष्ट्वा परिभ्रमसि भोक्तुमरे कुलायात् ।
गन्तुं क्षमो न हि बहिर्भज भावशुद्ध्यै
वैराग्यमेव न ततो हि सुखस्य हेतुः ॥ -१६९

अत्र शृङ्गारादिरसपूर्णं श्रीशरभेन्द्रमहाराजं दृष्ट्वा तत्समागम-मागाङ्क्षमाणां पुनः पुनस्तं द्रष्टुं यतन्तीं पराङ्मुखीं सखीं काचिद्विदग्धासखी तत्परीक्षार्थमागतं तत्पतिं ज्ञापयितुं अन्यत्र स्थितचूतफलं संवीक्ष्य धावन्तं नीडस्थितं शुकमुद्दिश्य वदति–

हे शुक ! रसपूर्णफलं दृष्ट्वा भोक्तुं किमर्थं परिभ्रमसि ? किन्तु तूष्णीमास्स्व, यतस्त्वं कुलायाद्बहिर्गन्तुं न क्षमोऽसि । अतः वैराग्यं भज । तदेव सुखहेतुरिति । प्रकृते तु त्वं कुलाङ्गना कुलं हित्वा बहिर्गन्तुं न क्षमासि । अतः सुखकारणं वैराग्यं स्वीकृत्य तूष्णीमास्स्वेत्यभिप्रायः । एवं चान्योद्देश्येन अन्यं प्रति वचनमात्र प्रतीयत इति ॥

विवृतोक्तिः –

"विवृतोक्तिश्लिष्टगुप्तं कविनाविष्कृतं यदि"

यत्र श्लेषेण गुप्तं यथाकथञ्चित् कविनाविष्कृतं चेत्तत्र विवृतोक्तिः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा –

आयाहि कीर रसपूर्णफलं निरीक्ष्य
तोषं न याहि निकटेऽसि बिडाल एषः ।
इत्थं सखी वदति कञ्जदलायताक्षि !
शीघ्रं व्रजाद्य विवशे मदनेन गेहम् ॥ -१७०

अत्र शृङ्गाररसपूर्णमागतं श्रीशरभेन्द्रं पश्यन्तीं सखीं तत्परीक्षार्थमागतं तत्पतिं च दृष्ट्वा काचित् तस्यास्सखी तां तदागमनं ज्ञापयितुं शुकमुद्दिश्य भोश्शुक ! रसपूर्णफलं दृष्ट्वा त्वं तोषं मा याहि । कुतः ? त्वन्निकटे बिडालस्तिष्ठति । अतस्त्वं मा यहीति श्लिष्टगुप्तं वचनमुवाचेति नायिकां प्रति काचिदुक्त्वा तस्मान्मदनेन मोहिते शीघ्रं गेहं व्रजेत्युक्तवतीत्युक्त्याश्लिष्टगुप्तमत्र यथा कथञ्चित्कविना विवृतमभवदिति ॥

युक्तिः –

"युक्तिः पराभिसन्धानं क्रियया नर्मगुप्तये"

यत्र स्वनर्मगुप्तये स्वक्रियया परवञ्चनं क्रियमाणं प्रतीयते तत्र युक्त्यलङ्कारः ।

यथा वा –

दृष्ट्वा सुखोद्रेकवशाद्धसन्ती
काचिद्वधूटी शरभेन्द्रदेवम् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

नाथं पुरस्तात्समवेक्ष्य शीघ्रं
समावहन्ती मुकुरं बभूव ॥ -१७१

अत्र वधूट्याः मुकुरधारणरूपस्वक्रियया मुकुरं दृष्ट्वा इयं हासं कृतवतीति भ्रान्त्युत्पादनेन श्रीशरभेन्द्रभूपतौ स्वानुरागरूपनर्मा-प्रकाशनाय प्रतिवञ्चनमनयाकृतमिति प्रतीयत इति । व्याजोक्तौ उक्त्या नर्मगोपनम् । युक्तौ तु स्वक्रिययेति व्याजोक्तेर्युक्तेर्भेदो द्रष्टव्यः ॥

लोकोक्तिः –

"लोकप्रवादानुकृतिर्लोकोक्तिरिति गम्यते"

यत्र लोकप्रवादानुकृतिरनुवादः प्रतीयते तत्र लोकोक्तिः ।

यथा वा –

सखि मदननिकाशं नाथमद्राक्षमस्याः
कुसुमशरहतासं चोलभूम्यास्तदैव ।
त्वमिह मदनपीडां नैव जानासि बाले
वदसि ननु जनोऽयं वेत्तिकष्टं स्वकीयम ॥ -१७२

अत्र जनः स्वकीयं कष्टं वेत्ति नन्विति लोकप्रवादानुकृतिः प्रतीयत इति ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

छेकोक्तिः —

" छेकोक्तिर्यत्र लोकोक्तेस्स्यादर्थान्तरगर्भता "

यत्र लोकोक्तेरर्थान्तरगर्भता प्रतीयते तत्र छेकोक्तिः ।

यथा वा –

खिन्नं मुखं केन सरोजसुन्दरं
रक्ते सिताम्भोजनिभे विलोचने ।
वद त्वमस्या असि वेदनां सखी
जानाति चेष्टां सहचारिणो जनः ॥ -१७३

अस्याः अये त्वं यतः सख्यसि अतोऽस्याः वेदनां वद निर्निमित्ततया मुखादौ खिन्नताद्ययोगात् । यतो लोके जनः सहचारिणो जनस्य चेष्टां जानात्यतः इत्यत्र जानाति चेष्टां सहचारिणो जनः इति लोकप्रवादानुवादः । अत्र ईदृशलोकोक्तेरर्थान्तरगर्भता च प्रतीयते । यतस्त्वं तया सह सञ्चारिणी ततः तस्य युक्तामिवायुक्तामपि चेष्टां जानासीति । एवं चात्र लोकप्रवादस्यार्थान्तर गर्भता प्रतीयत इति ॥

वक्रोक्तिः –

" वक्रोक्तिश्श्लेषकाकुभ्यामपरार्थ प्रकल्पनम् "

यत्र एकार्थपरत्वेन केनचिदुक्तस्य शब्दस्य श्लेषकाकुभ्यां अपरार्थपरत्वं परिकल्प्य, उत्तरं केनचिदुच्यते तत्र वक्रोक्त्यलङ्कारः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यथा वा —

कोऽयं सम्प्रति दृश्यते सखि दव श्रीतारकाणां पतिः
नैवास्त्यत्र नदीनदीनतनयो दैन्यं किलाम्भोनिधिः ।
गांभीर्यं समवेक्ष्य चोलनृपतेस्सम्प्राप्तवान्सीतगुः
सत्यं नैव दहत्ययं विरहिणीं पथ्यं त्वदीयं वचः ॥

चन्द्रं दृष्ट्वा सख्योक्तस्य शब्दस्य श्लेषकाकुभ्यां अर्थान्तर-परत्वं परकल्प्य विरहिणी प्रत्युत्तरं दत्तवतीति प्रतीयत इति ॥

स्वभावोक्तिः —

"स्वभावोक्तिस्स्वभावस्य जात्यादिस्थस्य वर्णनम्"

यत्र यज्जातिस्थितस्य स्वभावस्य वर्णनं प्रतीयते तत्र स्वभावोक्तिः ।

यथा वा –

वंशे श्रीशरभेन्द्रभूपतिमणेर्जाताः किशोरा अपि
श्रीमन्तो धृतखड्गकार्मुकशरास्संपूर्णचन्द्राननाः ।
निष्क्रान्तास्सदनात्कदाचिदधिकं प्रद्योतयन्तो दिशः
सौन्दर्यं सहजां च शक्तिमधिकां तेषां
न वक्तुं क्षमः ॥ -१७५

अत्र क्षत्रजातेरायुधादिधारणरूपस्य स्वभावस्य वर्णनं प्रतीयत इति ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

भाविकम् —

"भाविकम् भूतभाव्यार्थ साक्षात्कारस्य वर्णनम्"

भूतभावी योऽर्थसाक्षात्कारः तस्य यत्र वर्णनं प्रतीयते तत्र भाविकालङ्कारः ।

यथा वा —

धर्तुं साकृतकम्पनात्कुचतटाद्भ्रष्टं प्रवृत्ता पटं
काचित्तां कुचयोर्निमाच हृदयं तिष्ठत्यवोचं त्वया ।
हार्यं नेति तदास्मितं यदकरोत्तादृशी सुन्दरी
वर्तेते पुरतो ममाद्य सततं भूत्वा दृशोर्गोचरौ ॥ -१७८

अत्र भूतभाव्यर्थ साक्षात्कारवर्णनं प्रतीयत इति ॥

उदात्तम् —

"उदात्तमृद्धि चरितं श्लाघ्यं चान्योपलक्षणम्"

यत्रान्योपलक्षणमन्याङ्गमैश्वर्यचरितं श्लाघ्यं चरितं वा प्रतीयते तत्रोदात्तालङ्कारः ।

यथा वा —

आसीनं मणिमन्दिरे शरभभूनाथं कदाचिद्बुधाः
सर्वत्र प्रतिबिंबितं स्वपुरतो दृष्ट्वा तथा पार्श्वयोः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

वाक्यं नैव मृषेति यत्स्मृतिगतं नाविष्णुरित्यादिकं
ज्ञात्वा विश्वमयांशमेनमधिकं सन्तुष्टुवुः
क्ष्मापतिम् ॥ -१७७

अत्र अन्योपलक्षणमैश्वर्यचरितं प्रतीयत इति ।

धृत्वा कार्मुकमुच्चकैर्विलसितं हेमात्मना स्यन्दने
तिष्ठंश्चन्द्रनिभोरुहीरविलसत्कोटीरमूर्धा यदा ॥
सम्प्राप्तोऽसित विक्रमस्य जयिनो या प्रोल्ललासाधुना
मूर्तिस्सा त्रिपुरान्तकस्य रथिनः
श्रीचन्द्रचूडामणेः ॥ -१७८

अत्र वर्णनीयो राजा यदेदृशो भूत्वा सम्प्राप्तस्तदानीं तस्यानघा मूर्तिः प्रोल्ललास । ईदृशगुणविशिष्टस्य त्रिपुरान्तकस्य मूर्तिरित्युक्त्या अन्योपलक्षणं श्लाघ्यचरितं प्रतीयत इति ॥

अत्युक्तिः —

“ अत्युक्तिरद्भुतातथ्यशौर्यौदार्यविवर्णनम् ”

यत्र अद्भुतातथ्यशौर्यौदार्ययोः वर्णनं प्रतीयते तत्रात्युक्तिरलङ्कारः । यथा वा ।

मत्तेभकुम्भकबलीकरणाप्तमुक्ता-
जालावृतोदरमृगेन्द्रकुले प्रभिन्ने ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ता उत्थितास्तु गगने द्विजतां प्रयाता-
श्चोलेश्वरेण मृगयाभिरतेन भान्ति ॥ -१७९

अत्र अद्भुतातथ्यशौर्यवर्णनं प्रतीयत इति ॥

वदान्यकुलशेखरे शरभरत्नगर्भाधिपे
धनानि विशति प्रभौ विबुधमण्डलेभ्यो बुधाः ।
बभूवुरमितप्रदास्सपदि याचकेभ्यो यत-
स्ततोऽर्थिजनकल्पकक्षितिरुहात्मतां लेभिरे ॥ -१८०

अत्र वदान्यकुलशेखरे शरभरत्नगर्भाधिपे सति विबुधा अभ्यर्थिकल्पशाखिनो बभूवुरित्युक्त्या अद्भुतातथ्यौदार्यवर्णनं प्रतीयत इति । विबुधानामपि अर्थित्वेन अर्थिकल्पमहीरुहत्वाऽसम्भवादिति भावः । सम्पदत्युक्तौ उदात्तालङ्कारः । शौर्यात्युक्तौ अत्युक्त्य-लङ्कारः इति भेदः ॥

निरुक्तिः —

"निरुक्तिर्योगतो नाम्नामन्यार्थत्व प्रकल्पनम्"

यत्र यत्नाम्नो यौक्तिकत्वप्रदर्शनेन अन्यार्थपरत्वं वर्ण्यते तत्र निरुक्त्यलङ्कारः ।

यथा वा —

संवेदनाद्विबुधरक्षणदीक्षितत्वात्
शिलीमुखगर्वपरिमन्थनतत्परत्वात् ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

ऐश्वर्यतोऽपि शरभेन्द्र इति प्रसिद्ध-
नामैव ते ह्युचितमीश्वरभूतधाम्याः ॥ -१८१

किञ्च —

शम्भुश्शत्रुकुलानलो वितनुषे यस्माद्वरं जीवनं
लोकेष्वम्बुधरोऽवनीश जनता चिन्तामणिस्त्वं विभो ।
दीपस्त्वाश्रितलोकदैन्यतमसौ दाता रमानन्दनः-
स्त्रीणां श्रीशरभेन्द्रभूपतिमणे तथ्यं
तवैतद्वचः ॥ -१८२

अत्र एकाक्षररत्नमालारीत्या शरभेन्द्र इति नाम षट्कैर्वर्णैरयमर्थः संपद्यत इति ।

शो वल्मीके शिवे कूर्मे रः पुमान्पावके कामे ।
भश्शम्भौ भ्रमरे भात्रे शुक्रे शौ जलदे पुमान् ॥

इकारः फणिरत्नार्चिष्वग्रतोऽर्थगुहार्थयोः ।
अं शब्दो वक्रवाक्येति दीपेऽञ्जलिनियोगयोः ।
दः पुंसि दातरिच्छेदे दास्त्रियां कान्तिदानयोः ॥

प्रतिषेधः —

“प्रतिषेधः प्रसिद्धस्य निषेधस्यानुकीर्तनम्”

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

यत्र प्रसिद्धस्य निषेधस्य सङ्कीर्तनं प्रतीयते तत्र प्रतिषेधालङ्कारः ।

यथा वा —

चोलेश्वरस्य विमतायनवृत्तितो ये
लोके वसन्ति वसुधाधिपतां प्रपन्नाः ।
तूलेन नैव न तृणेन पितामहेन-
सृष्टास्त आत्मभिरहोऽल्पधृतिं प्रपन्नाः ॥ -१८३

अत्र परेषां राज्ञां तृणादिनिर्मितत्वाभावः प्रसिद्ध एव । तदभिधानं तु तेषां तृणादिभ्योऽपि लघुत्वरूपं अर्थं विशेषं गमयति । अल्पधृतिं प्रपन्ना इत्युक्त्या तृणादिभ्योऽपि तेषामल्पताभिधानात् । अल्पधृतिभ्यस्तृणादिभ्यः तेषां उत्पत्तिं निरस्य पुनश्चाल्पधृतिं प्रपन्ना इत्युक्त्या तेषां तृणादिभ्योप्यत्यन्ताल्पधृतित्वस्यैव प्रतीतेः ।

भावशबलालङ्कारः —

यत्र स्वभावस्य स्वीयभावान्तरेण शबलता-
प्रतीयते तत्र भावशबलालङ्कारः ॥

यथा वा —

प्राप्तार्थो न च यामि सन्निधिमितश्श्रीचोलभूमीशितुः
वाञ्छां को हि जहौ गतोऽस्मि यदि मां किं वा वदेयुर्जनाः ।

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

सिद्धार्थं न च तादृशाः प्रकृतितस्ते तत्र गास्चेत्तदा
स्तोकं स्यात्फलमल्पदो न हि कदाप्येपोऽवनी
नायकः ॥ -१८४

अत्र स्वभावस्य भावान्तरेण शबलतायाः प्रतीतिरिति ।

विध्यलङ्कारः —

"सिद्धस्यैव विधानं यत्तामाहुर्विध्यलङ्कृतिम्"

यत्र सिद्धार्थस्यैव पुनर्विधानं प्रतीयते तत्र विध्यलङ्कारः । ज्ञातार्थविधानमनुपयुक्तं सत् अर्थान्तरावगति साधनत्वेन चारुत्व हेतुर्भवती ।

यथा वा —

सन्त्येवावनिनायकाः क्षितितले सर्वत्र केचिज्जना-
राजानः परिपालका इति मुधा तान्सङ्गिरन्तेऽनिशम् ।
प्राप्तेऽर्थिजनेऽखिलेष्टकलनप्रख्यातकर्णादपि-
ख्यातश्चोलमहीश्वरो ननु भवेद्राजा पतिः
पालकः ॥ -१८५

अत्र सिद्धत्वेन उक्तावनुपयुक्तानि पुनर्विधेयमानानि राजत्वादीनि अर्थिजनेष्ट साधनस्वरूपेण सकलजनहृदयङ्गमानि भवन्ति । तच्चार्थिजन इत्यादिनाविष्कृतम् ।

CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

हेत्वलङ्कारः —

"हेतोर्हेतुमता सार्धं वर्णनं हेतुरुच्यते"

यत्र कार्येण सह कारणस्य वर्णनं तत्र हेत्वलङ्कारः ।

यथा वा —

यानि पङ्कजवान्धवस्य तनयं शौर्ये सुतं शन्तनोः-
जित्वा प्राप यशः स एव बहुशः पूर्वं भवद्भिश्श्रुतः ।
यश्श्रीचोलमहीश्वरोऽर्थिजनतादैन्यस्य विद्वेषिणां
गर्वस्यापगमाय नोऽद्य पुरतस्संप्राप्तवान्पश्यताम् ॥ १८६

अत्र अर्थिजननिष्ठदैन्यापगमरूपेण तथा विद्वेषिनिष्ठगर्वापगमरूपेण कार्येण सह कारणस्य श्रीचोलमहीश्वरागमनरूपस्य अभिधानं प्रतीयत इति ॥

"हेतुहेतुमतोरैक्यं हेतुं केचित्प्रचक्षते"

ऐक्यमैक्येन व्यपदेशः अयं चेदृशकारणसत्वे ईदृशं कार्यमविलम्बेनावश्यं भवतीति विज्ञापयितुम् ।

यथा वा — .

स्त्रीणां शृङ्गारपात्रं मह इह महितः पश्यतां लोचनानां
सौख्यं ... स्यूतः ।

CC-0. Saraswati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

धर्माणां, चोलसम्राट् शरभनरपतिः क्ष्मातलं पालयन्वै
जीवन्नाचन्द्रतारं जयतु सह सुतैर्वर्धतामस्य
लक्ष्मीः ॥ -१८७

अलङ्कृतिशतस्य यद्गदितमत्र तल्लक्षणं
कवीन्द्ररचितं मया न च नवीनमालोचितम् ।
किमत्र यदि दूषणं वदति कश्चिदीर्षावशो
भवन्ति परिपन्थिनः कविवरास्तु तस्यापरे ॥ -१८८

श्रीमान् श्रीसुखतीर्थसत्कृतिसुधावाराशिपारङ्गतः
संख्यावान्नरसिंहनामकथितः श्रीचोलभूमण्डले ।
चक्रेऽलङ्कृतिशास्त्ररत्नमधिकं रत्नाकरं नामतः
ग्रन्थं तोषमसौ तनोतु विदुषां रक्षन्त्वमुं ते सुखम् ॥

नीलालकावृतमुखाम्बुजराजमान-
मन्दस्मितादरुणकञ्जदलायताक्षात् ।
कृष्णात्करीन्द्रवरदात्कमितुश्श्रियो मे
वंशीकराच्चलतु नैव मनः परस्मात् ॥ -१९०

Colophon :

विरोधिनाम्नि वर्षेऽस्मिन्नन्थं रत्नाकराभिधम् ।
आज्ञया शरभेन्द्रस्य सखमेट्टो व्यलीलिखत् ॥

॥ श्रीसाम्बशिवार्पणमस्तु ॥

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

## ॥ श्लोकानुक्रमणिका ॥


| श्लोकः | पृष्ठ संख्या | श्लोकः | पृष्ठ संख्या |
|---|---|---|---|
| अन्यस्मिन्नन्यानिष्टः | 100 | कश्चिन्मां प्रसमीक्ष्य | 105 |
| अन्येद्यमसितापाङ्गा | 10 | काठिन्यं कुचयोः | 46 |
| अम्भोजकम्बुकुला | 82 | कागितार्थ प्रदा मूर्तिः | 105 |
| अरुणजलजपाणेः | 94 | किं कर्णेन महीरुहा | 7 |
| अलङ्कृतिशतस्य | 120 | किं दानानि | 17 |
| अलङ्कृतीनां कविसार्व | 1 | किं पद्मे किमु पल्लव | 13 |
| अल्पोऽपि चोलविषय | 88 | कीर्त्या पाण्डुर | 42 |
| असङ्ख्या गुणपूर्णोऽपि | 54 | कुर्वन्ति ते किसलयं | 60 |
| अहिमगुवरवंश | 38 | कुसुम मार्गणगो | 34 |
| आगातुं शरभाख्य | 57 | कृत्वा यतो दूरत एव | 8 |
| आदायेन्द्र कुतांश | 89 | कृत्वां व्याप्य | 6 |
| आदौ पश्यति तं च | 83 | कैलासे भाति | 23 |
| आयाहि कोर | 109 | कोयं न चाप्नोति | 35 |
| आसीनं मणिमन्दिरे | 113 | कोपाद्विप्रकृतान् | 8 |
| एकं वृषं फालविलोचनाय | 80 | कोऽयं विद्वन्सुधांशु | 16 |
| औन्नत्यगाम्भीर्य | 4 | कोऽयं संप्रति | 112 |
| करोतिन्दानानि महान्ति | 87 | गच्छामि चोलविषय | 93 |
| कस्त्वं भोः! शरभेन्द्र | 50 | गाङ्गेयस्य शरासने | 3 |


CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

| श्लोकः | पुठ संख्या | श्लोकः | पुठ संख्या |
|---|---|---|---|
| गाम्भीर्यं जलधौ | 16 | दत्तानि हाटकमयानि | 62 |
| गोभृद्वृषाश्रयः | 39 | दाता को वा बुधानां | 59 |
| ज्ञात्वाहृद्गतभावमाशु | 54 | दातारो ननु पार्थिव | 77 |
| चोलावनीन्द्र | 31 | दातुःश्रीशरभेन्द्रभूपति | 11 |
| चोलावनीन्द्रस्य | 38 | दातृत्वे रविज | 12 |
| चोलेशं वरखड्गपाणि | 96 | दानं कुर्वति चोलभूपति | 76 |
| चोलेशाननुगावनीश | 90 | दाने पङ्कजबान्धवस्य | 119 |
| चोलेश्वरस्य त्रिनतायन | 117 | दुग्धाब्धिर्निष्कलङ्को | 85 |
| जगद्भर्तौ शौण्डत | 15 | दुर्गे सत्यपि | 30 |
| जटातटनिवासिनी | 25 | दूरात्स्वन्तिकमागतान् | 106 |
| जनयति न च हेतुः | 22 | दृष्टवा तुष्यति | 82 |
| जनानामानन्दं जनयति | 2 | दृष्टवा नमन्तं पदयोर्म- | 104 |
| जवेषु गन्धर्वतावद्य | 5 | दृष्ट्वाब्ज मार्गणसमं | 92 |
| जहि भज परिपाहि | 78 | दृष्ट्वा सुखोद्रेकव | 109 |
| जातं तोयात्सरोजं | 58 | द्रष्टुं भूतिं त्वदीयां | 40 |
| त्यातलाग्रमवलम्ब्य | 26 | द्वेषं कुर्वति भूतरे | 95 |
| त्यक्त्वा सुधां शक्रपराक्रमस्य | 72 | धर्तुं मारुत कम्पनात् | 113 |
| त्यजन्ति मदगर्विता | 27 | धनुर्हस्ते चित्ते | 79 |
| त्वमेव विक्रान्ति | 36 | धर्मावृतां सिंहनरेन्द्र | 66 |
| तिष्टत्यतेष्टदाता शरभ | 86 | धृत्वा कार्मुकमुच्चकैः | 114 |
| तूष्णीं शुकास्व | 108 | नत्वा पदांभोरुह | 98 |
| दग्धःशृङ्गारयोनि | 74 | न मे भूयात्ताङ्कसखि | 95 |


CC-0.TSarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

| श्लोकः | पृष्ठ संख्या |
|---|---|
| नाथं प्राह सती विरुद्ध | 53 |
| नान्याद्वैतमादरेण | 45 |
| नालक्षि चोलाधिप | 102 |
| निन्दन्ति ये सुकृतिनः | 29 |
| निर्वाणं जगदीश्वरस्य | 75 |
| निर्वाणहेतुं शरभेन्द्र | 18 |
| निरीक्ष्य चोलेश मन | 91 |
| नीलालकावृतमुखाम्बुज | 120 |
| नैवाप्नोति पराभवं रिपु | 88 |
| पादांभोरुह सन्नरवं | 85 |
| पुण्यं कारणमाहुरत्र | 15 |
| प्रतपतिमिहिरे | 56 |
| प्रतापभानौ प्रतपत्यजस्रं | 57 |
| प्रफुल्लजलजं विधुं | 13 |
| प्राप्तः शत्रुकुलं | 28 |
| प्राप्तार्थो न च यामि | 117 |
| बुधानां सद्धर्मो | 96 |
| भजशरभ महीन्द्र | 81 |
| भवादृशानां शरभेन्द्र | 51 |
| भवेद्विबुध मण्डलं | 64 |
| भास्वन्गोगणसंवृतोऽपि | 39 |
| भूत्वा गन्धी नभस्वान् | 94 |
| भूभागं केचिदाहु | 14 |
| भून्ति प्रतापे | 13 |
| भेदस्समालक्षि विभू | 103 |
| मग्नासि त्वं घनरसे | 107 |
| मत्तेभकुंभ कबली | 114 |
| महीदृष्ट्वा सेनां | 20 |
| माधुर्यं तव वाचि | 37 |
| मान्धातृ प्रमुखाश्च ये | 69 |
| मुधाचिन्तां त्यक्त्वा | 84 |
| मृगीदृशां स्वर्णविभूष- | 102 |
| मेरोःकल्पतरुर्नचैव | 23 |
| यत्कोपरक्त नयनांबुज | 70 |
| यदा नमन्त्येन महोन | 98 |
| यस्यप्रतापाद्रशगा | 75 |
| यस्य ब्रह्माण्डभाण्डात् | 1 |
| यशः प्रतापौशरभेन्द्र | 21 |
| यशः प्रतापौ दरचक्र | 22 |
| याञ्जेतुं मनसावगच्छति | 27 |
| येनेष्टमापुः परमार्थं | 74 |
| ये वै स्तुवन्ति | 32 |
| यो मोहाविष्टचित्तः | 76 |
| ररक्षुरखिलां क्षमां | 24 |


CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

| श्लोकः | पृष्ठ संख्या | श्लोकः | पृष्ठ संख्या |
|---|---|---|---|
| रक्षत्वन्धोनरेन्द्रः | 80 | वृपाकरोऽब्जेक्षण | 41 |
| राजन् केरलनाथ तावक | 72 | वैदुष्यं ननु बुद्धिमाप | 65 |
| राधेये त्रिदिवं गतेऽपि | 99 | संवेदनाद्विबुधरक्षण | 115 |
| लसद्विबुध मण्डले | 20 | सखि मदननिकाशं | 110 |
| ललति मुखशशाङ्के | 10 | सत्यं चोलमहीश | 73 |
| लोके कीर्तिस्त्वदीया | 28 | सति शरभमहीन्द्रे | 25 |
| वंशे श्रीशरभेन्द्र भूपति | 112 | सद्भू निर्जितगात्रं | 97 |
| वदान्यकुलशेखरे | 115 | सदृश इति शशाङ्कं | 6 |
| वदान्यमभियाचते | 92 | सन्त्येवावनिनायकाः | 118 |
| वदान्यवर्यो वरणीय वर्चको | 40 | सर्व समर्प्य वसुधां | 49 |
| वधूटी कन्दर्पं | 12 | सर्वेन्द्रिय सुखास्वादो | 92 |
| वहन्ति शिरसा | 34 | सभामनासाद्य | 50 |
| वाहारूढेऽभियोद्धुं | 48 | सम्प्राप्य नाथपदवीं | 61 |
| वितन्वन्ती कान्तातटिदिह | 10 | समागतमिवद्रुं शरभरत्न | 48 |
| वितस्य भुवनेषु | 17 | समागते श्रीशरभेन्द्र | 35 |
| विद्युल्लतेव गगने | 30 | साश्रितो यश्शरभेन्द्र | 37 |
| विनासभां चोलमहीश्वरस्य | 29 | साम्प्रं त्वद्वयास्तकीर्ते | 63 |
| विपक्षगानां तव | 52 | सारासार विवेकिनः | 36 |
| विपक्षभूपालकुलं | 59 | सार्वज्ञं शरभेन्द्रभूपति | 101 |
| विप्रास्सन्त्यधिकं | 71 | सार्वज्ञात्समगुर्यतो | 15 |
| विलसति ननु भूम्यां | 9 | सुरधुनि विबुधेन्द्राः | 47 |
| विलोकिते दातरि | 32 | सौधाग्रे काचिदिन्दुं | 9 |


CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

| श्लोकः | पृष्ठ संख्या |
|---|---|
| स्त्रीणां श्रृङ्गारपात्रं | 119 |
| स्नातुं गच्छति गाङ्गवारिणि | 67 |
| स्वर्गे कल्पमहीरुह | 52 |
| स्वविरावर सन्दिराद्गरल | 69 |
| स्विन्नं मुखं केन | 111 |
| शरभेन्द्र महीपाल | 19 |
| शशाङ्कदलशेखरः | 33 |
| शम्भुशत्रुकुलानलो | 116 |
| शेषो यद्यभवं तदेव | 90 |
| शो वल्मीके शिवे कूर्मे | 116 |
| शौर्यं रामे कृते भूङ्गुवर | 78 |
| शौर्यजह्नुसुतोद्भवेन | 4 |
| श्रीमच्चोलमहीशदान | 63 |
| श्रीमालम्बुज | 1 |
| श्रीमान् श्रीतुलजेन्द्र | 67 |
| श्रीमान् श्रीसुखतीर्थं | 120 |
| श्रुत्वा गोश्वरणेभ्यः | 21 |
| हरिरथसभियातुं | 44 |
| हे कर्णाट महीश | 62 |
| हेती श्रीशरभेन्द्र | 55 |
| हे, दारिद्र्य कृपां विधाय | 65 |
| हृतविमतमहीभृद्राष्ट् | 49 |
| हंसं द्वेष्टयधिकं यतः | 68 |


CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

# வேண்டுகோள்

கருணையுள்ளங்கொண்ட நம் முன்னோர்கள், அரிய பெரிய இலக்கியங்களையும், பிறவற்றையும், பனையோலைகளில் எழுதிச் சுவடிகளாக நமக்குத் தந்தனர். அவைகள், பல்வேறு இடங்களில் முடங்கி உள்ளன. சுவடிகள் பழுதடைவதற்குமுன் சரசுவதி மகாலுக்கு அன்பளிப்பாகக் கொடுத்துதவினால், அவைகள் மக்களுக்குப் பயன்படும்.

மகாலுக்குக் கொடுப்பதன் மூலம், சுவடி தந்தவர்களும், சுவடி எழுதியோரும் அழியாப் புகழை, பெருமைசால் சரசுவதி மகால் உள்ளளவும் பெறுவர். அவை பதிப்பாகி வருமாயின் சுவடி தந்தார் பெயரும் இடம் பெறுவதோடு, அப்பதிப்பில் ஐந்து பிரதிகளும் பெறுவர்.

எனவே, "நாம் பெற்ற பேறு பெறுக இவ் வையகம்" என்ற எண்ணமுடைய நற்பண்பாளர்கள் தம்மிடமுள்ள சுவடிகளைச் சரசுவதி மகாலுக்குத் தந்துதவ வேண்டுகிறேன்.

தஞ்சாவூர்.
10—8—90.

மு. சதாசிவம், எம்.ஏ., எம்.லிட்.,
இயக்குநர், சரசுவதி மகால் நூலகம்.

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy

( Sarasvati Mahal Library Press. Thanjavur. )

CC-0. Sarasvati Mahal Series. Digitized by Sri Muthulakshmi Research Academy